वर्षम् 73
अङ्कः -06
वैशाखमासः
विक्रमाब्दः 2080
युगाब्दः 5125
अप्रेल, 2023

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः १५/-
वार्षिक-शुल्कम्
१५०/-
पञ्चवार्षिकशुल्कम्
७००/-
पञ्चदशवार्षिकशुल्कम्
२१००/-

प्रकाशन प्रत्येक माह की 1 तारीख



# विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | सम्पादकीयम् | प्रोफेसर श्रीकृष्णशर्मा | ४ |
| २ | गोपाङ्गनावैभवमहाकाव्यम् | डॉ. प्रमोदकुमारशर्मा | ६ |
| ३ | श्रुत-बोध-कथा | डॉ. नारायणकाङ्कर: | १० |
| ४ | मा वीरा विस्मृता भूवन् | डॉ. महेशचन्द्रगौतम: | ११ |
| ५ | तव कथामृतम् | आचार्यनथमलशास्त्री दाधीच: | १५ |
| ६ | तारोद्भवा वैखरी | प्रो. ताराशंकरशर्मा पाण्डेय: | १८ |
| ७ | भारतीपञ्चकम् | नरेन्द्रमहर्षि: | १९ |
| ८ | धनसञ्चयस्य अन्वेषणम् | डॉ. योगिनी हिमांशु व्यास: | २० |
| ९ | भासतां काव्यदीपप्रभा भारते | डॉ. प्रीति आर. पुजारा | २१ |
| १० | ज्योतिषशास्त्रस्य त्रिस्कन्धत्वम् | देवेन्द्रकुमारशर्मा | २२ |
| ११ | पराम्बाकृपाकाङ्क्षा | डॉ. रामनारायणझा: | २६ |
| १२ | सभ्यता संस्कृतिश्च | डॉ. कैलाशचन्द्रबुनकर: | २८ |
| १३ | पुस्तक-समीक्षा | महामहोपाध्यायदेवर्षिकलानाथशास्त्री | ३० |
| १४ | नारीस्तम्भ: | डॉ. राजेश्वरी भट्ट: | ३१ |
| १५ | आयुर्वेद-स्तम्भ: | प्रो. बनवारीलालगौड: | ३२ |


## पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठका: निवेद्यन्ते यद् भारत्यां प्रकाशिता: शोधलेखा:, सामयिकनिबन्धा:, कविता:, कथा:, विनोदवार्ता:, लघुनाट्यकृत्यादयो भवद्भ्य: कथं रोचन्ते? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाष: 0141-2379014, मो. 9799011085**

(धनादेश/चैक/ड्राफ्ट केवल ''भारतीय संस्कृत प्रचार संस्थान'' के नाम से ही भेजें- प्रवन्ध सम्पादक)

ISSN2249-698X

।। श्रीशः ।।

# भारती

## संस्कृत-मासपत्रिका

संस्थापकौ
स्व. उमाकान्तकेशव आप्टे ( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
श्रीश्यामशरणदेवाचार्यः
( निम्बार्कपीठम्, सलेमाबादः )
स्वामी रामभद्राचार्यः
( चित्रकूटः )
स्वामी अवधेशानन्दगिरिः
( हरिद्वारम् )
महन्तः गोविन्ददेवगिरिः
( पुणे )
स्वामी राघवाचार्यवेदान्ती
( अग्रपीठम् रेवासा )
महन्तः प्रतापपुरी
( तारातरामठम्, बाडमेरम् )
श्रीदामोदरदासमोदी ( जयपुरम् )

सम्पादकमण्डलम्

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्रोफेसर श्रीकृष्णशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकौ
प्रोफेसर सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

सहायकसम्पादकः
डॉ. स्नेहलता शर्मा

भारतीयसंस्कृतप्रचारसंस्थानम्

उपाध्यक्षौ
डॉ. नाथूलालसुमनः
डॉ. नन्दसिंहनरूकाः

सचिवः
डॉ. सुधीरकुमारशर्मा

सहसचिवः
कृष्णाकुमारशर्मा

व्यवस्थापकः
राजीवदाधीचः
9352030291

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com
वेबसाइट : www.bhartipatrika.org

वर्षम् 73 अङ्कः -06
वैशाखमासः
विक्रमाब्दः 2080
युगाब्दः 5125
अप्रेल, 2023

एकस्याः प्रतेः 15/-
वार्षिकशुल्कम् 150/-
पञ्चवार्षिकशुल्कम् 700/-
आजीवनसदस्यताशुल्कम् 2100/- ( 15 वर्षाणि )

सम्पादकीयम्

# विष्णोरंशावतारोऽयं रामः परशुना सह

...✍ प्रोफेसर श्रीकृष्णशर्मा

वैशाखमासे शुक्लपक्षेऽक्षयतृतीयायां तिथौ लब्धजन्मा भृगुवंशे महर्षेः ऋचीकस्य पौत्रः ऋषि-जमदग्नेः पत्न्या 'रेणुका' इति नाम्न्याः गर्भजः परशुरामः। अस्य मौलिकं नाम 'राम' इत्येवासीत्। शिवाराधनेन सन्तुष्टः शिवस्तस्मै 'परशु' इत्याख्यमस्त्रं प्रादात्। तेन परशुना युतो रामः **'परशुराम'** इति ख्यातः। प्रतिवर्षम् अक्षयतृतीयायां 'परशुराम-जयन्ती'ति मान्यते। हर्षस्य विषयोऽयं यद् 19 मार्च 2023 दिनाङ्के जयपुरनगरे सञ्जाते 'ब्रह्मणमहापञ्चायत' सम्मेलनावसरे भारतसर्वकारस्य प्रतिनिधिभूतः केन्द्रीय-रेलमन्त्री श्री **अश्विनीकुमारवैष्णवो** भगवतः परशुरामस्य सम्मानार्थं तन्नाम्ना **'डाक-टिकिट'** इति प्रारब्धं इति घोषितवान्। महाभारत-विष्णुपुराण-भागवतपुराणेषु वर्णितमस्ति परशुरामचरितम्।

तदनुसारं कान्यकुब्जेश्वरस्य गाधेः सुतासीत् **सत्यवती**। तया सह भृगुपुत्रस्य ऋचीकस्य विवाहोऽभूत्। एकदा ऋचीकः स्वपत्न्या गाधिपत्न्या (श्वश्र्वा) चापत्यकाम्याभ्यां वरः प्रार्थितः। उभयोः प्रार्थनां स्वीकृत्य ऋचीकः पृथक्-पृथङ् मन्त्रैरौषध-मिश्रितं चरुं पक्त्वा ताभ्यां प्रादात्। त्रुटिवशात् सत्यवती तन्मातुश्चरुं, तन्माता (गाधि-पत्नी) च स्वपुत्र्याः सत्यवत्याश्चरुं चखाद। एतज्-विज्ञाय ऋचीकः स्वपत्नीं प्राह-अनर्थो जातः। युवाभ्याम् अन्योऽन्यस्य चरुर्भक्षितः। अतस्तव पुत्रः क्षत्रियगुणोपेतो घोरप्रकृतिकः, तव भ्राता च ब्राह्मणगुणोपेतो महान् ब्रह्मज्ञानी भविता। क्षमां याचितवत्या सत्यवत्या त्रुटिनिराकरणाय प्रार्थितः ऋचीकोऽवदत् पुत्रो मा भूदेवम्, किन्तु पौत्रस्तु भवेदेव घोरो दण्डधरः।

अस्तु। सत्यवतीसूनुरभवद् **महर्षिर्जमदग्निः**। गाधिसुतोऽभवद् महर्षि-**विश्वामित्रः**। स च तपोबलेन क्षत्रियत्वमुत्सृज्य ब्रह्मवर्चसमवाप।

इक्ष्वाकुवंशीयो राजाऽभवत् '**प्रसेनजित्**' नामा। स राजा विगताहङ्कारत्वाद् रेणु (धूलि) वद् अमन्यत आत्मानम्, अतो 'रेणु' नाम्ना प्रसिद्धः।

तस्य पुत्री रेणुकन्या '**रेणुका**' जाता। रेणुरस्या अस्तीति व्युत्पत्तौ 'व्रीह्यादिभ्यश्चे'ति (5.2.116) ठन्, 'इसुसुक्तान्तात् कः' (पा. 7.3.51) इति ठनः कादेशे रेणुकेति। तया सह जमदग्नेः परिणयोऽभूत्। तयोरात्मजो 'रामः' परशु-धारणात् 'परशुराम' इत्याख्यातः सः ब्रह्म-क्षत्रियः शस्त्र-शास्त्रयोरलौकिकीं विद्यामधि-जगाम। विष्णोर्दशावतारेष्वयं षष्ठ इति मन्यते। तथा हि-

**मत्स्यः कूर्मो वराहश्च नरसिंहोऽथ वामनः।**
**रामो रामश्च कृष्णश्च बुद्धः कल्की च ते दश।।**

सप्तसु चिरजीविसु चायं स्मर्यते-

**अश्वत्थामा बलिर्व्यासो हनूमाँश्च विभीषणः।**
**कृपःपरशुरामश्च सप्तैते चिरजीविनः।।** इति।

एकदाऽस्य माता 'रेणुका' जलमानेतुं गङ्गानदीं गतवती। तत्राप्सरोभिः क्रीडन्तं गन्धर्वराजं चित्ररथं किञ्चित्-कालपर्यन्तं स्पृहापूर्वकं दृष्टवती, पत्युर्जमदग्नेर्हवनवेलाञ्च नाऽस्मरत्। तदेवं गङ्गाजलाभावे जगदग्नेरनुष्ठाने विलम्बः सञ्जातः। पत्न्या मानस-व्यभिचारं तपोबलेन ज्ञात्वा प्रकुपितो मुनिः स्वपुत्रान् मातुर्वधार्थम् आज्ञापयामास। पित्रा प्रेरिता अन्ये पुत्राः (रुक्मवान्, सुषेणुः, वसुर्विश्वावसुश्चेति नामानः) तु पितुराज्ञां न स्वीकृतवन्तः, परं स्वपितुर्योगबलं तपोबलञ्च ज्ञात्वा परशुरामो मातुश्शिरश्छिन्नवान्। मातृ रक्षार्थमागतान् रुक्मवान्-प्रभृतीनपि स्वभ्रातृन् व्यापादयामास। परशुरामस्यानेन कर्मणाऽतीवप्रसन्नो जमदग्निस्तं वरं याचितुमादिष्टवान्। परशुरामो हतानां सर्वेषामपि जीवितं वधस्य स्मृतिलोपञ्च ययाच। मृताः सर्वेऽपि जमदग्निप्रभावेण

परशुरामस्य सौमनस्येन च पुनर्जीविता: ।तथा हि -

**उत्तस्थुस्ते कुशलिनो निद्रापाय इवाञ्जसा।**
**पितुर्विद्वांस्तपोवीर्यं रामश्चक्रे सुहृद्वधम्।**

(भा.पु. ९/१६/८)।

बृहदारण्यकोपनिषदि (2.5.16-17) अपि एतादृशी कथा श्रूयते यद् दधीचिना अश्विनीकुमाराभ्यां मधुविद्योपदेशकारणाद् रुष्ट इन्द्रो दधीचिऋषेश्शिरश्छिन्नवान्। अश्विनीकुमारौ पुन:सन्धानचिकित्सायां कुशलौ आस्ताम्। ताभ्यां ऋषेर्मौलिकं शिर: पुनर्योजितम्।ऋग्वेदमन्त्रोऽप्यत्र प्रमाणम्-

**तद्वां नरा सनये दंस उग्रमा-**
**विष्कृणोमि तन्यतुर्न वृष्टिम्।**
**दध्यङ् ह यन्मध्वाथर्वणो**
**वामश्वस्य शीर्ष्णा प्रयदीमुवाच।।**

- ऋग्वेद:, 1.116.12

महाभारतकाले दानवीर: कर्ण: द्रोणाचार्यो भीष्मश्चास्य शिष्या बभूवु:। हैहयवंशीयक्षत्रियैर्दुष्टराजभि:सहास्य जामदग्न्य-रामस्य बहुकालावधिकं युद्धमभवत्।

अत्रायं प्रक्रम:। माहिष्मती-नरेश: कृतवीर्यस्य पुत्रो **हैहयवंशीयोऽर्जुन:** दत्तात्रेयशिष्य: सहस्रबाहुरिति ख्यात आखेटार्थम् इतस्ततो विचरन् यदृच्छया सेनासहितो जमदग्नेराश्रमं प्रत्यागत:। ऋषेराश्रमे कामदुघा गौ: कामधेनुरासीत्। तत्प्रतापेनैव हैहयाधिपते: कार्तवीर्यस्य सेनासहितस्याश्रमे मनस्तोषकरं सत्कारं कृतवान् महर्षि:। कार्तवीर्य: कामधेनोरैश्वर्यं ज्ञात्वादिशत् सैन्यबलं तदाश्रमात् कामधेनुमपहर्तुम्। अपहृत्य सवत्सां कामधेनुं क्रन्दन्तीं बलात् माहिष्मतीं स्वराजधानीं निनाय कार्तवीर्य:।

कार्तवीर्यार्जुने निर्यति सति परशुरामस्तत्राश्रमं समागत:। दुर्वृत्तान्तं श्रुत्वा चुक्रोध। परशुं घोरमादाय राजानमन्वधावत जामदग्न्य:। कठोरनेमिना परशुना राम: सहस्रबाहोर्भुजान् चिच्छेद कृत्तबाहो: शिरश्च पृथक्कृतवान्। अग्निहोत्रीं कामधेनुम् आश्रमे समादाय स्वपित्रे जगदग्नये समार्पयत्।

जमदग्नि: कामधेनुमवाप्य प्रससाद। परं सेनासहितस्य हैहयाधिपतेर्वधं श्रुत्वा दु:खमवाप। सम्बोधितश्च परशुरामो जमदग्निना यत् त्वयेदं पापमकारि, यतो मूर्धाभिषिक्तस्य राज्ञो वधो ब्रह्महत्यादपि गुरुर्भवति। अत: प्रायश्चित्तमाचरणीयम्। भगवत: स्मरणपूर्वकं पुण्यतीर्थान् व्रज त्वम्, जहि पापानि, यतो **वयं हि ब्राह्मणास्तात क्षमयैव प्रपूजिता:**। पितुराज्ञां शिरोधार्य परशुरामो वर्षमेकं यावत् तीर्थाटनं विधाय जमदग्नेराश्रमं पुनराजगाम।

कदाचित् स्वपितु: सहस्रबाहोर्वधस्य प्रतीकारार्थं पापनिश्चयास्तस्य पुत्रा: परशुरामस्यानुपस्थितौ भगवच्चिन्तनरतमग्निशालायामासीनं महर्षिं जमदग्निं जघ्नु:। दु:खशोकार्त्ता जमदग्निपत्नी सती रेणुकोच्चै: स्वसुतं परशुरामं सम्बोध्य चुक्रोश -

**रेणुका दु:खशोकार्ता निघ्नन्त्याऽऽत्मानमात्मना।**
**राम रामेहि तातेति विचुक्रोशोच्चकै: सती।।**

- भावगतपुराणम्, ९/१६/१३

'हा तात साधो धर्मिष्ठ त्यक्त्वास्मान् स्वर्गतो भवान्' इत्येवं विलपन् राम: परशुमधिगृह्य **दुष्टक्षत्रियाणां संहाराय** मनो दधे। स्वपितृवधं निमित्तीकृत्य परशुरामो **दुर्दान्तक्षत्रियै:** सह एकविंशतिवारं युयुधे नि:क्षत्रियाञ्च पृथिवीं चकार। **अत्रेदमवधेयम्**-ब्रह्माघ्नक्षत्रियानेव परशुरामो दण्डयामास, न तु क्षतात् किल त्रायकान्। भागवते श्रूयते यदद्यापि चिरजीवित्वात् प्रशान्तचेता: न्यस्तदण्ड: स महामुनि: महेन्द्रपर्वते निवसतीति।

**- सम्पादक:**
जोधपुरस्थ-जयनारायणव्यासविश्वविद्यालये
संस्कृतविभागाध्यक्षचर:, जयपुरस्थ-जगद्गुरु-
रामानन्दाचार्य- राजस्थान-संस्कृत-विश्वविद्यालये
व्याकरणपीठाध्यक्षचरश्च।
दूरभाषाङ्का: 8386943655

क्रमशः

# गोपाङ्गनावैभवमहाकाव्यम्

## ( अथ दशमस्सर्गः )

❑ डॉ. प्रमोदकुमारशर्मा

महिम्नःपारं ते परमरमणीयस्य दयित !
व्रजस्य स्निग्धस्य प्रचुररुचिरस्यास्य परितः।
समर्थःको ज्ञातुं श्रयति कमला यत्र रमणी
समागत्य स्नेहान्मधुरमुरलीं श्रोतुमभितः ।।१।।

विना त्वां कालेऽस्मिन् विरहविकलाश्शक्तिरहिताः
तपामःकामाग्नौ प्रियतमसुहृत्ते स्मृतिधराः।
अये कृष्ण !प्रेमिन् !यदुकुलपते !शुल्करहिताः
वयं सर्वाःदास्यस्तव चरणयोरर्पितहृदः।।२।।

सखे !ते सौन्दर्यम्परमरमणीयन्नयनयो
र्वियोगेह्यप्यात्मस्थं रमणमधुरं सुन्दरतमम्।
निहन्ति स्नेहेन प्रतिपलमहो नो यदुपते !
किमस्त्रेण श्रीमन् !भवति हननन्त्रान्यविधिना।।३।।

वयं कामिन्यस्ते रतिपतिसमस्त्वं व्रजपते !
व्रजस्यास्माकं त्वं बहुविधविपत्तिप्रशमकः।
व्रजेश !त्वं गोप्ता त्वमसि करुणायाःप्रतिकृतिस्
त्वमेव स्वामी नो यदुकुलमणे !पाहि परितः।।४।।

वियोगावस्थायां तव विरहिणीनां यदुपते !
प्रियाणां गोपीनां त्वमसि शरणं कृष्ण !परितः।
निधेहि त्वं हस्तं शिरसि सरसं स्नेहभरितं
कृपापूर्णं स्निग्धं प्रियतम !सखे !नो हितकरम्।।५।।

किमर्थं रुष्टोऽसि प्रियगिरिधर क्वासि भगवन् !
प्रसन्नस्सञ्ज्ह्वामम्मुखकमलमादर्शय सखे !।
कुरु स्नेहम्मत्वा तव चरणदासीति नितरां
विना त्वामस्माकं बहुसमय एष व्यपगतः।।६।।

हरे ! ते पादौ तौ परमरमणीयावतिशुभौ
स्वयं श्रीस्तौ पादौ श्रयति सततं कल्मषहरौ।
निधायैवैतौ नः कठिनकुचयोःकोमलतमौ
वियोगाग्निज्वालां विरहजनितां त्वम्प्रशमयेः।।७।।

अये कृष्ण प्रेष्ठ !क्व तव मधुवाचा विकथनं ?
स्फुटालोकःप्रेम्णा परमसुखदायी नयनयोः।
क्व गोपीभिस्सार्धं स्मितवदनहासःक्व मुरली-
निनादःकालिन्दीतटवटतरौ कर्णमधुरः।।८।।

कदा संयोगस्ते कमलनयन !प्रीतिजनको
विना संकोचेन स्मितवदनधारिन् प्रभविता।
वियोगं हित्वास्मानधरसुधया तर्पय सखे !
प्रतीक्षायां सर्वा वयमिह रतास्स्मःप्रतिपलम्।।९।।

वयं सर्वान् त्यक्त्वा यदुकुलवर !त्वामुपगताः
तथा चैकाकिन्यश्शशिकिरणधौते ह्युपवने।
सखे !संसारेऽस्मिन् त्यजति पुरुषः को हि युवतीः
समायाताःपार्श्वे वद कितव ! कामेन मथिताः।।१०।।

स्मरामस्ते रूपञ्जलधररुचिं श्यामलतमं
समायाहि प्रेष्ठ त्वमिह निकषास्मान् कुरु कृपाम्।
अये दीनानाथ !त्यज हृदयरोषं सुहृदय !
क्षमस्व त्रायस्व त्वमतिहृदयालुःकुरु दयाम्।।११।।

दिदृक्षायां गोप्यस्सखिहृदयचौरस्य परितो
निलीनश्यामस्य स्मृतिपटलसंशोभितहरेः।
यदैवं सन्तप्ताश्शृणु हरिसुभक्तोद्धव ! वने
विलापं कृत्वा ताः हरिकृतवियोगे विरुरुदुः।।१२।।

तदानीमेवासौ रतिपतिरिव श्यामलतनुः
महास्रग्वी शौरिस्स्मितवदनपीताम्बरधरः।
हरिस्तासाम्मध्ये सखिजनमनोरञ्जनकरः
समाविर्भूतोऽहो कमलनयनोऽयं शशिनिभः।।१३।।

समायातं दृष्ट्वा नयनसुखदं सुन्दरतमं
समुत्तस्थुर्गोप्यो हरिमतुलनीयं ह्यनुपमम्।
अतीवोत्साहेन प्रमुदितशरीराश्च मिमिलुर्
व्रजेशं गोबिन्दं विमलयमुनातीरपुलिने।।१४।।

कयाचिद्धस्तेन प्रचुरकमनीयम्भगवतो
गृहीत्वा संस्पृष्टम्परमपवितं हस्तकमलम्।
निजस्कन्धे चान्या सुखदमपरं स्थापितवती
तदानीं सानन्दं ललितसुकुमारी स्मितमुखी।।१५।।

प्रियाभिर्गोपीभिर्विविधविधिभिस्संस्तुतिपरैः
स्तुतो गोबिन्दोऽसौ धवलिततनूरासरसिकः।
तदानीं गोपीनाम्प्रियतमसुयोगेन सहसा
वियोगादुत्पन्नं विरहतपनं तद्व्यपगतम्।।१६।।

प्रियं दर्शं दर्शं यदुकुलशशिं ता युवतयस्
तदा प्रेम्णा कामम्मनसि च बभूवुः पुलकिताः।
श्रिया सम्पन्नोऽपि प्रियजनवृतःप्रेमसहितस्
तदाहो गोबिन्दो निरतिशयसौन्दर्यमगमत्।।१७।।

ततो वृन्दारण्ये प्रियतमसखोऽसावनुपमो
निशायां गोबिन्दस्सखिपरिवृतो हि प्रियतमाः।
शरच्चन्द्रद्योत्ये दिनकरसुकन्याजलयुते
तटे कालिन्द्यास्तास्सुखदरमणीये समनयत्।।१८।।

तदानीञ्चन्द्रस्य क्षितितलमतिश्वेतकिरणैः
प्रकृत्या सुस्नातं रजतसदृशैश्शीतलतमैः।
समीरःस्म स्पृष्ट्वा नुदति हरितं कोमलतमं
स्वतो मन्दम्मन्दम्मलयजसुगन्धस्सुखमयः।।१९।।

सुखानां साम्राज्यं विविधतपसां तत्प्रतिफलं
समुत्पन्नञ्जातं सुरपतिनिकायस्थलमिव।
तदा गोप्यःसर्वाःसुखमयसमुद्रे समभवन्
निमग्नास्सानन्दं व्रजपतिकिशोरेण सह ताः।।२०।।

तटे भ्रामम्भ्रामं नटवरवपुःकृष्णमभितः
प्रियं गायं गायं सुमधुरतमं गीतमुरसा।
तदा श्रावं श्रावं मधुरमुरलीं ताम्भगवतस्
तथा नर्तं नर्तम्परमचपलास्ता युवतयः।।२१।।

परिश्रान्तम्मत्वा व्रजजनसखं तत्र वनिताः
स्तनाभ्यामुत्तुथाप्य प्रियसहचरायातिमृदुलम्।
दुकूलं गोप्यस्ताःरजसि विमले पावनतटे
निजं संस्थाप्यादौ मृदुलमतयस्तं वितुतुपुः।।२२।।

यतीन्द्रा यं कृष्णं परममुनयो नैव हृदये
क्षणादूर्ध्वं धर्तुं कथमपि समर्थास्तमनघाः।
दुकूले संस्थाप्य व्रजपतिमतीवोद्धव!हरिं
सुसेवन्ते गोप्यस्सकलजगतस्स्वामिनमहो।।२३।।

प्रियाणां गोपीनां प्रियतमकिशोरस्य च महान्
तयोःप्रेमालापस्समजनि तदा प्रीतिजनकः।
करोषि त्वं कस्यां नटवर!वद प्रेम नितरां
किमर्थम्प्रेष्ठ!त्वं त्यजसि बहुधास्मान् व्रजपते!।।२४।।

अये!सुप्रेयस्यो मम न हृदये काचिदपरा
न चाहं कस्याञ्चिद्रमणमधुरायामपि रमे।
रमन्ते ये नित्यं मयि मम सदा तेषु सुतरां
निवासो मन्तव्यःप्रियतमजनेषु प्रियतमाः!।।२५।।

यदि प्रेम्णा प्रेम त्रुटितहृदयेन प्रियतया
प्रियाःपूर्णन्नित्यन्निजमनसि वाञ्छन्ति सुजनाः।
तदा गोप्यस्तेषां व्यवहृतिरियं स्वार्थभरिता
न ते प्रेम्णःयोग्यास्तदपि न लभन्ते स्थिरतया।।२६।।

सुकुर्वद्भ्यःप्रेम प्रियतमजनेभ्योऽपि न तथा
करोमि प्रेमाहं सुमुखि!करणीयं शृणु यथा।
मनोवृत्तिस्तेषां भवतु मयि चाग्रेऽधिकतया
तदर्थं लुप्तोऽहं पुनरपि भवामि प्रकटितः।।२७।।

यथा कश्चित् प्राणी धनविरहितः प्राप्य कनकं
प्रहृष्टस्सन्तुष्टो भवति च पुनःशोकरहितः।
तथा मे भक्ता मामपि विरहसम्पीडितहृदो
विलुप्तं सम्प्राप्य प्रचुरसुसुखं यान्ति परितः।।२८।।

प्रिया गोप्यो नूनञ्जनधनगृहाणि प्रथमतो
विहाय स्वीयानि स्वयमिह समागुर्मम कृते।
परिस्थित्यामस्याम्पुनरपि भवेद्धो मयि मनो
न कुत्राप्यन्यत्र प्रभवतु निलीनोऽभवमतः।।२९।।

न दोषो मे प्रेम्णि स्वयमहमपि प्रेमनिरतः
परोक्षे युष्मासु स्मरणनिरतासु प्रियतमाः!।
भवामि प्रेमिभ्यःक्षणमपि सुदूरेऽहमपि वा
न मे कश्चित् प्रेमी कथमपि वियुक्तो हि भवति।।३०।।

प्रिया यूयं सर्वा मम च भवतीनामहमथ
प्रियो नूनं गोप्यो मिलनमिदमत्यन्तसुखदम्।
सदा निर्दोषोऽपि प्रियतमसुखस्यास्ति जनको
द्वयोस्संयोगो नौ परमरमणीयोऽयमुभयोः।।३१।।

ऋणेभ्यो नो मुक्तोऽहमिह भवतीनाम्प्रियतमाः
भविष्यामि स्निग्धप्रियरचितसेवासुखधरः।
कथञ्चित्तुष्टाभिःप्रियमृदुलभावैर्मम यदि
प्रमुक्तोऽहं तर्हीयमपरमिता वो ननु कृपा।।३२।।

सुखानां सर्वेषां निखिलगुणविद्याधरपते
रधिष्ठानस्य श्रीपतिसदृशगोपीजनरतेः।
तदेत्थं श्रुत्वा तास्सुखदमधुवाचो भगवतो
जहुस्सर्वं दुःखं विरहजनितं तत् प्रियतमाः।।३३।।

अये भक्तश्रेष्ठ! व्रजपतिपदप्रेमिहृदय!
स्वयं वृन्दारण्ये परमरमणीयेऽतिसुखदे।
समारब्धा जाता परमसुखदानन्दभरिता
महारासक्रीडा विपुलयमुनातीरपुलिने।।३४।।

अहो सम्प्रीताभिर्व्रजयुवतिभिर्बद्धसुभुजैः
तदान्यान्याभिश्श्रीयदुपतिशशिस्नेहभरितैः।
महागोलाकारे रमणरजसि प्रेमनिकरः
प्रियोऽसौ गोबिन्दो मधुरमुरलीशःपरिवृतः।।३५।।

द्वयोर्मध्ये चैकःप्रियतमसखः प्रीतिजनकः
समाविर्भूतोऽसौ बहुषु निजरूपेषु रसिकः।
सखीभिर्गोपीभिस्सह सहचरश्श्यामसुभगः
समारेभे रासं परमसुखदे सुन्दरतटे।।३६।।

कराभ्यामाबद्धाःप्रियमधुरसंस्थापितभुजम्
मनोहारिण्यस्ता यदुकुलवरम्प्राप्य निकटम्।
महारासे रम्ये कमलनयनाभ्यान्नयनयो-
रपूर्वं सौंदर्यं नवसुखदकृष्णस्य ददृशुः।।३७।।

तदानीमाकाशे शशिकिरणपूर्णे सिततमे
महारासं द्रष्टुं बहुसुरगणा दिव्यवसनाः।
सपत्नीकाःदिव्यं परमसुखलाभार्थमभितः
विमानेष्वायाता यदुपतिमुकुन्दानुमतिना।।३८।।

निनेदुर्वाद्यानि स्फुटितरवपूर्णानि नितरां
निपेतुश्चाकाशात् सुरभितसुपुष्पाणि बहुधा।
जगुस्ते गन्धर्वाःयदुपतियशो दिव्यममलं
तदानीं स्ववेश्या नभसि मधुरास्ता विननृतुः।।३९।।

महारासे तस्मिन् यदुपतिकिशोरेण सह ताः
महावृन्दारण्ये व्रजयुवतयश्चाभिननृतुः।
शुशोभे श्रीकृष्णो मृदुरजसि मध्ये ननु तदा
मणीनां हैमानाम्मरकतमणिस्स्यात् खलु यथा।।४०।।

सुनृत्यं कुर्वन्त्यो बहुविधमहो कृष्णमभितः
सुगीतं गायन्त्यो मधुरतममुच्चैश्च वनिताः।
विलासैर्भ्रूभङ्गैर्व्रजपतिकिशोरप्रियतमाः
विरेजुस्ता गोप्यस्तडित इव मेघे ऽतिचपलाः।।४१।।

तदा पादन्यासैर्भुजविधुतिभिस्सस्मितमुखै-
रहो भज्यन्मध्यैश्चलकुचपटैस्साकमभितः।
रराजे गोपीनां शिथिलवपुभिश्शिलष्टसुभुजो
सुरासे गोबिन्दो नटवरवपुर्दीप्तवपुषा।।४२।।

सुगायन्तं कृष्णं सममनुसरन्ती प्रियसखी
स्वरे स्वारस्येन प्रियतमसखं काचिदपरा।
समुन्निन्ये तीव्रं ध्रुपदमनुकूलं सुमधुरं
तदा तस्यै मानं बहुविधमदाद् रागरसिकः।।४३।।

चिरं नर्तं नर्तं शिथिलितभुजां काञ्चिदपरां
गतां सङ्गं स्नेहादलसगमनां चुम्बितमुखीम्।
समाश्लिष्याधात्तामधरसुधयास्वादितरसं
तदास्ये ताम्बूलं व्रजपतिमुकुन्दोऽतिरसिकः।।४४।।

प्रियं काचिद्रम्या रमणरजसि स्नेहभरिता
न्यधात् स्कन्धे हस्तं कमलमधुरं राजितहरेः।
सुनृत्यन्ती काचिद्धरिकरमधाद्वक्षसि शिवं
समाश्लिष्टा पृष्ठादुरसि युवतिस्सा प्रियतमम्।।४५।।

तदान्यान्या गोप्यःप्रियविविधचेष्टासु निरताः
महारात्री तस्यान्नटवरकिशोरेण सह ताः।
तथा रामं रामम्प्रियनिजसखीभिर्व्रजपतिः
बभूवानन्देऽसौ शिशुरिव निमग्नो रतिरतः।।४३।।

श्रियःकान्तं लब्ध्वा प्रियतमपतित्वेन वनिताः
विहारं कुर्वन्त्यस्सुमधुरकरेषु व्रजपतेः।
दधानाः कर्णेषु स्फुटकमलपुष्पाणि मधुराः
समाबद्धा कण्ठेष्वतिमृदुलदोर्भ्यां शुशुभिरे।।४७।।

मुखेषु स्वेदस्य स्फुटकणसमूहोऽतिविमलः
कपोलेष्वालोकादलककृतशोभा निरुपमा।
तदानीं गोपीनां यदुकुलपतेश्चातिविभया
श्रिया वक्त्राणां सा धवलरजनी तत्र शुशुभे।।४८।।

व्रजेशाङ्गस्पर्शाद् व्रजकुलबधूट्यःपुलकिताः
दुकूलं केशान् वा कठिनकुचवस्त्राणि परितः।
हृषीकाणि प्रेम्णा विचलितमनांसि प्रमथिताः
निरोद्धुन्नो शेकुर्निजवपुषि कामातुरतया।।४९।।

रतिक्रीडासक्तप्रभुयदुपतेःप्रेमभरितां
दशामेनां दृष्ट्वा नभसि सुरपत्न्योऽपि मुमुहुः।
शशाङ्कस्ताराभिस्सह सहचरीभिर्विचकितो
बभूव श्वेताभिःमदनविकलःकाममथितः।।५०।।

महाप्रेमानन्दे प्रतिकमलमास्वादितरसो
वशीभूतःप्रेम्णा भ्रमर इव मग्नो यदुवरः।
महानात्मारामोऽपि च स भगवांस्तत्र विपिने
विशुद्धश्चैतन्यम्प्रतिसखि सुरेमे प्रतिपलम्।।५१।।

शुद्धं ब्रह्म सनातनं ह्यनुपमम्भक्तोद्धव!ज्ञानिनां
हृद्देशे रमते यदेव सततं सच्चित्स्वरूपम्परम्।
सोऽयम्प्रेमवशाद् व्रजेन्द्रभगवान् वृन्दावनाधीश्वरो
गोपीभिस्सह खेलति प्रतिपलं धन्या इमा गोपिकाः॥५२॥

**********

सम्पूर्तिमगाद्दशमस्सर्गो गोपाङ्गनावैभवमहाकाव्यस्य

अखिलभारतीय 'माघ' पुरस्कारेण सम्मानितः

**सह-आचार्यः**
संस्कृतमेवं प्राच्यविद्याध्ययनसंस्थानम्
जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली-67

श्रुत-बोध-कथा -

# युक्त्या किं नहि सिध्यति ?

❑ कोविद-कुल-किङ्करः **डॉ. नारायणकाङ्करः**
राष्ट्रपति-सम्मानितः

एकः जम्बुकः स्वपत्न्या जम्बुक्या सह प्रातः जलं पातुम् एकस्मिन् सरोवरे गतः। तौ दम्पती रात्रौ अतिपिपासाकुलौ आस्ताम्। सरोवरस्य तटे उपविष्टम् एकं सिद्धं दृष्ट्वा एकबारं तौ व्यथितौ अभूतां, परन्तु द्वितीयस्मिन् एव क्षणे युक्तिम् एकां विचार्य तौ सिंहम् उपगतवन्तौ।

तत्र जम्बुकी सिंहं निवेदितवती- 'अयि ज्येष्ठ-महोदय! आवयोः न्यायं भवान् कृपया करोतु। आवयोः त्रयः शावकाः सन्ति। तेषु द्वौ शावकौ अयं मे पतिदेवः ग्रहीतुम् इच्छति, एकं च मह्यं दातुम् इच्छति। पुनर् अहम् एकं शावकम् अस्मै मम पत्ये दत्त्वा द्वौ शावकौ स्वयम् अहं स्व-समीपे रक्षितुम् इच्छामि। अहम् एकं शावकं किं गृह्णीयाम्? अहं तु सर्वान् जनयित्वा पालितवती पोषितवती च अपि। अहं त्रीन् अपि शावकान् अत्र आनयामि। पुनर् भवान् यथा इच्छेत्, तथा करोतु' इति उक्त्वा जम्बुकी सरोवरे जलं पीत्वा गतवती।

सिंहः मनसि कथितवान्- 'अद्य कस्यचन भद्र-मनुष्यस्य मुखं दृष्टं, येन मे त्रिभिः शावकैः प्रातराशनं सम्पत्स्यते।' परन्तु बहु-समये व्यतीते अपि यदा जम्बुकी नैव आयाता, तदा जम्बुकः कथितवान्- 'स्वामिन्! सा कुलटा अधुना अपि नैव परावृत्ता। तस्याः नीतौ अवश्यम् अन्तरम् अस्ति। सा स्वयं द्वौ शावकौ ग्रहीतुम् इच्छति। अहम् इदानीं तां निगृह्य आनयामि' इति उक्त्वा सः अपि सरोवरे जलं पीत्वा ततः निर्गतः।

यदा द्वौ अपि दम्पती नैव परावृत्तौ, बहु-बुभुक्षा च सिंहं सन्तापयितुं लग्ना, तदा सः स्वयम् एव द्वयोः न्यायं कर्तुं तयोः निवास-स्थानम् उपगत्य उच्चैः शब्दापितवान्- 'अरे! स्व-शावकान् आदाय शीघ्रं बहिर् आयातम्, अहं न्यायं कुर्यां, विलम्बं मा कुरुतम्।'

सिंहस्य आह्वानम् आकर्ण्य जम्बुकी अन्तःस्थिता एव उदतरत्- 'ज्येष्ठ-महानुभाव! अत्र आगन्तुं भवता कष्टं किं कृतम्? अयं मे पतिदेवः द्वौ शावकौ ग्रहीतुम् इच्छति। अहम् अबला किं कुर्याम् अस्मै द्वौ शावकौ दत्तवती। एकेन एव शावकेन यथाकथञ्चित् आत्मानं सन्तोषयिस्यामि। ईदृशः न्यायः आवाभ्यां दम्पतीभ्यां स्वयम् एव कृतः।'

जम्बुक्याः वार्त्तां निशम्य सिंहः निराशः सन् ततः निवृत्तः इति।

क्रमानुगतम् -

# मा वीरा विस्मृता भूवन्

## ( शौर्यगाथा )

❑ डॉ. महेशचन्द्रगौतमः
साहित्य-अकादम्या पुरस्कृतः

**कदाचिद् विस्मृता भूवन् मा वीरा बलिदानिनः।**
**येषामाहुतिदानेन भारतस्य यशः स्थिरम्।।**
**सुखं चेत् काम्यतेऽस्माभिर्लोकानाञ्च समर्धता।**
**अधमर्णा वयं येषां स्मर्तव्यास्ते निरन्तरम्।।**
**मा वीरा विस्मृता भूवन् योद्धारो देशरक्षकाः।**
**लक्ष्यसिद्ध्यै समग्रं यैः प्रत्याख्यातं जगत्सुखम्।।**
**भारतमिदं जगत्यां प्रथयति यद्यात्मनो यशो नितराम्।**
**कृपयैतद्वीराणां येऽहौषुर्जीवनं स्वेषाम्।**
**मदीया लेखनी तेषां बलिदानेन भाविता।**
**विलक्षणचरित्राणामद्य स्मरति भूरिशः।।**

**टिप्पणीः** भाविता - प्रेरित (स्त्रीलिङ्ग).

**सरलार्थः** बलिदानी वीर कभी भी विस्मृत न हों जिनके प्राणों की आहुति देने से भारत का यश स्थिर है। यदि हम सुख चाहते हैं और देशवासियों की समृद्धि चाहते हैं तो जिनके हम ऋणी हैं उन्हें निरन्तर याद करना चाहिए। जिन्होंने लक्ष्य की सिद्धि के लिए संसार के सभी सुखों का परित्याग कर दिया देश के रक्षक उन वीर योद्धाओं को कभी भी भुलाया न जाये। यदि यह भारत संसार में अपने यश को ख़ूब फैला रहा है, यह उन वीरों की कृपा से है जिन्होंने अपने जीवन होम कर दिये। उनके बलिदान से प्रेरित मेरी लेखनी विलक्षण चरित्र वाले उन वीरों को आज बहुत याद करती है।

**१९४७ तमे ईसवीयसंवत्सरे नवम्बरमासस्य तृतीयायां तिथौ स्पशसूचनेन परिज्ञातमभूद् यत् पाकिस्तानस्य सैन्याधिकारिणां नेतृत्वे प्राय एकसहस्रसंख्यकानां कबायलीनां समूहोऽभिद्रुवन् श्रीनगरं प्रति प्रक्रामति। श्रीनगरस्थम् एयरफील्डे-त्यभिधेयं वायुयानमार्गमभिगृह्य भारतीयसैन्य-बलेभ्योऽस्त्रशस्त्राणामन्यस्य च सम्भारस्या-पूर्तिमार्गस्य व्यवच्छेदोऽवर्तिष्ट शत्रूणां लक्ष्यम्। बडगामेत्यभिधेयो ग्रामः श्रीनगरस्थाद् वायुयान-मार्गात् प्रायस्त्रिचत्वारि किलोमीटराणि दूरे स्थितोऽवर्तिष्ट। बडगाम एव परिश्लिष्टाश्छद्म-वेशधारिणः कापटिका आक्रान्तारस्ततोऽग्रेऽति-क्रमितुं नानुज्ञातव्या एतदर्थं मेजरसोमनाथशर्मणो नेतृत्वे ४-कुमाऊँ इत्यभिधेयस्य सैन्यसमूहस्य योद्धारो व्युष्टिकाल एव बडगामाय प्रास्थिषत। कैप्टनरोनाल्डवुडस्य नेतृत्वे पैराकुमाऊँसैन्यदलं पूर्वमेव ततः प्रास्थित।**

**टिप्पणीः** स्पशसूचनेन - गुप्तचर द्वारा दी गई सूचना से, अभिद्रुवन् - आक्रमण करता हुआ, परिश्लिष्टाः - उलझे हुए, व्युष्टिकाले - पौ फटने के समय, प्रास्थिषत - चल पड़े (प्र√स्था, लुङ्, प्र.पु.ब.व., 'समवप्रविभ्यःस्थः' पा.सू. १.३.२२ इत्यात्मनेपदम्).

**सरलार्थः** ईस्वी सन् १९४७ में नवम्बर महीने की तीन तारीख को गुप्तचर द्वारा दी गई सूचना से पता चला कि पाकिस्तान के सैन्य अधिकारियों के नेतृत्व में लगभग

एक हज़ार कबायलियों का समूह हमला करता हुआ श्रीनगर की ओर बढ़ रहा है। श्रीनगर स्थित एयरफील्ड कही जाने वाली हवाई पट्टी को छीनकर भारतीय सैन्यबलों के लिए अस्त्र-शस्त्र और दूसरी सामग्री की आपूर्ति को काटना शत्रुओं का लक्ष्य था। बडगाम नाम का गाँव श्रीनगर में स्थित हवाई पट्टी से लगभग तीन-चार किलोमीटर दूर स्थित था। बडगाम में ही उलझे हुए छद्म वेशधारी कपटी आक्रमणकारियों को वहाँ से आगे अतिक्रम न करने दिया जाये इसलिए मेजर सोमनाथ शर्मा के नेतृत्व में ४-कुमाऊँ नाम के सैन्यदल के योद्धा पौ फटने के साथ ही बडगाम के लिए चल पड़े कैप्टन रोनाल्ड वुड के नेतृत्व में पैरा कुमाऊँ सैन्यदल पहले ही वहाँ से चल पड़ा था।

**मेजरसोमनाथशर्मा उच्चाधिकारिभ्योऽसुसूचद् यत्तेषां सैन्यदलं ग्रामस्य पश्चिमायां दिशि शैलस्य सुरक्षिते भूभागे संस्थितिमग्रहीष्ट। सैनिकास्तत्र खातकानि निरमीमपन्। पैराकुमाऊँ-सैन्यबलमपि ग्रामस्य दक्षिणपूर्वस्यां दिशि संस्थितिं गृहीत्वा शत्रूणां कर्मोद्योगं निरैक्षिष्ट। यद्यपि ग्रामाद् बहिः प्रणालस्य सुरक्षिते भागे विशालसंख्यायां समवेता ग्रामवासिनः शत्रुभ्य आत्मानं गोपायन्त इव प्रत्यगायिषत तथापि, भीता अपि भूयिष्ठा ग्रामवासिनः स्वस्वकार्येषु व्यासक्ता अदर्शिषत। शान्तः कात्स्न्येनाक्षुब्धश्चावर्तिष्ट सर्वतो ग्रामः। सर्वं शान्तमवलोकयन्तोऽधिकारिणः पैराकुमाऊँ-सैन्यबलं श्रीनगरस्थं वायुयानमार्गं प्रत्यावर्तितुं निरदिक्षन्। किञ्चित्कालानन्तरं सर्वं सामान्यमनुभूय ते मेजरसोमनाथशर्माणमपि प्रत्यागन्तुं निरदिक्षन्। सायं यावत् स्थितिं सुसमीक्ष्यैव तस्य सैन्यबलं प्रतिनिवर्त्स्यतीति स निरणैषीत्।**

**टिप्पणी:** संस्थितिः – पोजीशन, खातकानि – खन्दकें, कर्मोद्योगम् – गतिविधियाँ, प्रत्यगायिषत – लग रहे थे, प्रतीत हो रहे थे (प्रति✓ इण्, भावकर्म, लुङ्, प्र.पु.ब.व.).

**सरलार्थः** मेजर सोमनाथ शर्मा ने उच्चाधिकारियों को सूचित किया कि उनके सैन्यबल ने गाँव के पश्चिम की ओर पहाड़ी के सुरक्षित भूभाग पर पोजीशन ले ली है। सैनिकों ने वहाँ खन्दकें बना ली हैं। पैराकुमाऊँ सैन्यबल भी गाँव के दक्षिणपूर्व की ओर पोजीशन लेकर शत्रुओं की गतिविधियों को देख रहा है। यद्यपि गाँव से बाहर नाले के सुरक्षित भाग पर विशाल संख्या में एकत्रित गाँववासी शत्रुओं से अपने आप को बचाते हुए प्रतीत हो रहे थे, तथापि, डरे हुए भी अधिकांश गाँववासी अपने-अपने कार्यों में लगे दिखाई दे रहे थे। गाँव सब ओर से शान्त और पूरी तरह हलचल से रहित था। सब कुछ शान्त देखते हुए अधिकारियों ने पैराकुमाऊँ सैन्यबल को श्रीनगर में स्थित एयर फील्ड में लौटने हेतु निर्देश दे दिया। कुछ समय के बाद सब कुछ सामान्य अनुभव करके उन्होंने मेजर सोमनाथ शर्मा को भी लौटने का निर्देश दे दिया। साँझ तक स्थिति की अच्छी तरह समीक्षा करके ही उसका सैन्यबल लौटेगा, यह उसने निर्णय लिया।

**प्रणालस्य समीपे स्थितान् यान् जनान् मेजरसोमनाथशर्मा सुरक्षादृष्ट्या समवेतान् ग्रामवासिनोऽमंस्त वस्तुतस्तेऽवर्तिषत ग्रामीणानां**

**छद्मवेशे तत्र समवेताः कबायलीशत्रुसैनिका येषां नेतृत्वमेको मेजरोऽकार्षीत्। स्थानीयैर्ग्रामवासिभिः सह व्यामिश्रीभूय व्यवहरन्तस्ते वस्तुतो गुलमर्गस्य सङ्कीर्णैर्मार्गैः शनैः शनैरागच्छत आत्मनः साहाय्यकारिणः सैनिकान् प्रत्यैक्षिषत। पर्याप्तसंख्यायामेकत्रीभूते साहाय्यकारिसैन्यबले बडगामग्राममाक्रम्य तदनन्तरञ्च श्रीनगरं प्राप्य, वायुयानमार्गं परिगृह्य भारतीयसैन्यबलस्यापूर्तिमार्गमवच्छेद्य जम्मूकश्मीरराज्यस्याभिग्रहणमवर्तिष्ट शत्रूणां लक्ष्यम्। अपराह्ने प्रायः सार्धद्विवादनसमये समवेतमात्रे प्रायः सप्तशतसंख्यकानां कबायलीनां सैन्यबले शत्रवो भारतीयसैन्यबलमाक्रमिषुः। एतावद् विशालसंख्यायां गुरिल्लाऽऽक्रमणकारिणः पर्यवस्थातुं मेजरसोमनाथशर्ममहाभागस्य नेतृत्वे तत्रावर्तिष्ट केवलं नवतिवीराणां सैन्यबलम्।**

**टिप्पणीः** व्यामिश्रीभूय – घुल-मिलकर, पर्यवस्थातुम् – सामना करने के लिए।

**सरलार्थः** नाले के पास स्थित जिन लोगों को मेजर सोमनाथ शर्मा सुरक्षा की दृष्टि से एकत्रित ग्रामवासी समझ रहे थे वस्तुतः वे ग्रामीणों के छद्म वेश में वहाँ एकत्रित कबायली शत्रु सैनिक थे जिनका नेतृत्व एक मेजर कर रहा था। स्थानीय ग्रामवासियों के साथ घुल-मिलकर व्यवहार करते हुए वे वस्तुतः गुलमर्ग के दर्रों से धीरे-धीरे आ रहे अपने सहायक सैनिकों की प्रतीक्षा कर रहे थे। सहायक सैन्यबल के पर्याप्त संख्या में एकत्रित हो जाने पर बडगाम गाँव पर आक्रमण करके और उसके बाद श्रीनगर पहुँचकर, हवाई पट्टी पर कब्जा करके भारतीय सैन्यबल के आपूर्ति मार्ग को काटकर जम्मू कश्मीर राज्य पर अधिकार करना शत्रुओं का लक्ष्य था। दोपहर बाद लगभग ढाई बजे लगभग सात सौ कबायलियों के सैन्यबल के एकत्रित होते ही शत्रुओं ने भारतीय सेना पर आक्रमण कर दिया। इतनी विशाल संख्या में गुरिल्ला आक्रमणकारियों का सामना करने के लिए मेजर सोमनाथ शर्मा महोदय के नेतृत्व में वहाँ केवल नब्बे बहादुरों का सैन्यबल था।

**ग्रामस्य दिशो गोलिकानां प्रहारो मेजरसोमनाथशर्माणं विस्मेरं व्यधात्। भारतीयसैन्यबलं गोलिकावर्षस्योत्तरं गोलिकाभिरदास्यच्चेत् कदाचिदकृतापराधा ग्रामवासिनो गोलिकानां लक्ष्यं समभविष्यन्नित्याशङ्कास्माकं सैन्यबलं ग्रामस्य दिशि गोलिकाप्रहारान्यवीवरत्। शीघ्रमेव पश्चिमायां दिशि शैलस्य प्रवणभूमिं प्राप्य शतशो गुरिल्लाऽऽक्रान्तारो मोर्टारैः स्वचालितैर्बन्दूकैश्चाक्रमिषुः। अप्रशिक्षिताः कबायलीपठानाः पाकिस्तानस्य सैन्याधिकारिणो नेतृत्व एतत्सर्वमकार्षुः।**

**विकटायामेतादृश्यां परिस्थित्यां मेजरसोमनाथशर्माऽऽत्मनो जीवनस्य सुरक्षां प्रति निरपेक्ष एकस्मात् खातकादन्यत् खातकं धावन्नात्मनो वीरसैनिकानामुत्साहं निरन्तरमववर्धत् तान् सपराक्रमं योद्धुञ्च प्रैरिरत्। तेन प्रवर्तितैः सैनिकैः शौर्येण सम्पादितस्य युद्धस्यैवावर्तिष्ट स परिणामो यदकस्मादुपक्रान्ते तस्मिन् संयुगे वयं शत्रूनभिभावयितुमक्षमिष्महि। संख्यायामत्यधिकाः कबायलीपठानाः शीघ्रमेव**

**भारतीयसैन्यदलं तिसृभ्यो दिग्भ्यः पर्यवारिषुः। मेजरसोमनाथशर्मा सुष्ठुरूपेणाज्ञास्त यदत्यधिक-संख्यायां सन्ति शत्रवः। स आत्मनो ब्रिगेडकमाण्डरं यथाशीघ्रं गोलिका बारूदमतिरिक्तं सैन्यबलञ्च प्रेषयितुं प्रार्तथत।**

**टिप्पणी:** प्रवणभूमिः – ढलान, खातकम् – खन्दक, पर्यवारिषुः – घेर लिया, मेजर, ब्रिगेडकमाण्डर आदि पदों के वाचक शब्दों को और मोर्टार, बन्दूक, बारूद आदि शब्दों को भाषा की ग्राह्यता बढ़ाने की दृष्टि से यथावत् संस्कृत में अपनाया गया है।

**सरलार्थ:** गाँव की ओर से गोलियों के प्रहार ने मेजर सोमनाथ शर्मा को आश्चर्यचकित कर दिया। यदि भारतीय सेना गोलियों की वर्षा का उत्तर गोलियों से देती तो कदाचित् मासूम ग्रामवासी गोलियों का लक्ष्य बन सकते थे इस आशंका ने हमारे सैनिकों को गाँव की ओर गोलियाँ चलाने से रोका। शीघ्र ही पश्चिम की ओर पहाड़ की ढलान पर आकर सैंकड़ों गुरिल्ला आक्रान्ताओं ने मोर्टार और ऑटोमेटिक बन्दूकों से आक्रमण कर दिया। अप्रशिक्षित कबायली पठान पाकिस्तानी सैन्य अधिकारी के नेतृत्व में यह सब कर रहे थे।

इस प्रकार की विकट परिस्थिति में मेजर सोमनाथ शर्मा अपने जीवन की सुरक्षा की परवाह न करते हुए एक खन्दक से दूसरी खन्दक दौड़ते हुए अपने बहादुर सैनिकों का उत्साह निरन्तर बढ़ा रहे थे और उन्हें शौर्य के साथ युद्ध करने की प्रेरणा दे रहे थे। उससे प्रेरित सैनिकों द्वारा वीरता से किये गये युद्ध का ही वह परिणाम था कि अकस्मात् शुरू हुए उस युद्ध में हम शत्रुओं को पराजित कर सके। संख्या में अत्यधिक कबायली पठानों ने भारतीय सैन्यदल को तीन ओर से घेर लिया। मेजर सोमनाथ शर्मा अच्छी तरह जानते थे कि शत्रु अत्यधिक संख्या में हैं। उन्होंने अपने ब्रिगेड कमाण्डर को यथाशीघ्र गोला बारूद तथा अतिरिक्त सैन्यबल भेजने के लिए प्रार्थना की।

*क्रमशः ...*

– पटियाला पञ्जाब, दूरभाषाङ्कः 9781124775


## ऐसे बन सकते है आप भारती पत्रिका के ग्राहक :-

**भारती पत्रिका का वार्षिक शुल्क रुपये 150/-, पंचवर्षीय शुल्क 700/-, आजीवन सदस्यता ( 15 वर्ष ) शुल्क 2100/- मात्र है। आप केनरा बैंक की किसी भी शाखा में जाकर हमारे निम्नलिखित खाते में राशि जमा करा कर जमा रसीद की फोटो प्रति ई-मेल से या डाक द्वारा भिजवा देवें।**

**खाते का नाम - भारतीयसंस्कृतप्रचारसंस्थान**

**खाता संख्या - 2139101912498**

**IFS Code - CNRB0002139**

क्रमागतम् ....

# तव कथामृतम् (गद्यकाव्यम्)

❑ आचार्य पं.नथमलशास्त्री दाधीचः

**भारती-पाठकाः हंसाः काव्यं मे मानसं सरः।**
**विरमन्तः पिबन्त्यत्र भक्त्या हरिकथामृतम्।।**

संस्कृतानुरागिणः सारग्राहिणः सुधियो हंसा भक्तिभावभरिताः भारती-पाठकाः सुधीराः सुमनसोऽस्मिन् मे काव्यमानसरोवरे पदे पदे सानन्दं विरमन्ति, भवाब्धितारकं सुमधुरं हरिकथामृतञ्च पिबन्ति। यथा कैलाशाद्रिस्थे परमपावने रम्यतरे तीर्थे मानसरोवरे हंसा विरमन्ति। श्रीमद्भागवतं भक्तिज्ञानविरागात्मं सिद्धान्तशास्त्रमुच्यते मनीषिभिः। विषयेऽस्मिन्वेदव्यासम्प्रति निगदितानि देवार्षिनारद-वचांसि प्रमाणभूतानि विलसन्ति।

**न यद् वचश्चित्रपदं हरेर्यशो**
**जगत्पवित्रं प्रगृणीत कर्हिचित्।**
**तद्वायसं तीर्थमुशन्ति मानसा**
**न यत्र हंसा निरमन्त्युशिक्क्षया।।**

(भा. १/५/१०)

कवीनां काव्येषु यया वाचा जगत्पावनं परमात्मनः श्रीकृष्णस्य सर्वपापप्रणाशनं यशो न गीयते, सा कर्हिचित् शब्दशक्तिरसरीतिगुणभावध्वन्यलङ्कारादि-युक्ता स्यात्तथापि वायसोच्छिष्टस्थालीवापवित्रा सर्वथा हेया हि मन्यते। यतो हि तत्काव्यात्मकं काक-तीर्थमपावनम्। तत्र च मानसरोवरीयाः कमनीय-कमल-वनविहारिणो हंसास्तु कदापि न विरमन्ति, तद्वदेव श्रीभगवच्चरणाश्रिताः परमहंसाः परमविरक्ता ब्रह्मभूताः सन्तो महात्मानो भक्तिरसविहीने काव्ये न विरमन्ति।

एवञ्च -

**तद्वाग्विसर्गो जनताघविप्लवो**
**यस्मिन्प्रतिश्लोकमबद्धवत्यपि।**
**नामान्यनन्तस्य यशोऽङ्कितानि**
**यच्छृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः।।**

(भा.पु. १/५/११)

शब्दार्थभावरसालङ्कारादिकाव्यकलादिहीनं सदोषमपि काव्यं यदि श्लोके श्लोके पदे पदे भगवन्नामगुणयश-कथा-कीर्तनापलापितं पठनाच्छ्रवणाच्च जनताघ-विप्लवं विद्यते, तर्हि सत्पुरुषैः स्वाध्याये नित्यसेव्यं गेयं कीर्तनीयं श्रवणीयञ्च भवतीति सिद्धान्तप्रतिपादनम्।

सर्वशक्तिमन्तं योगयोगेश्वरं भक्तवत्सलं वासुदेवं जगद्गुरुं भगवन्तं श्रीकृष्णं स्तुवती पाण्डवानां माता भक्तिमती कुन्ती गद्गदया गिरैवं निगदति।

हे केशव! अविद्याजनितकामकर्मनिपीडितानां त्रितापतप्तानां लोकानां श्रेयसे हि भवताऽवनितलेऽवतारं गृहीत्वा गोकुलवृन्दावनमथुरामण्डले सुमधुराः परमाद्भुताः पठनश्रवणमननयोग्या बह्व्यो याः रासक्रीडाद्या दिव्यलीलाः सुविहिताः मुहुर्मुहुस्ताः संस्मृत्य प्रपन्नभक्तार्तिहरं लीलापुरुषोत्तमं त्वां भक्त्या नमामि।

केचन महात्मानः सर्वसिद्धान्तसारं कथा-कीर्तन-

माहात्म्यमेवं प्रवदन्ति। यथा-

**शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः**
**स्मरन्ति नन्दन्ति तवेहितं जनाः।**
**त एव पश्यन्त्यचिरेण तावकं**
**भवप्रवाहोपरमं पदाम्बुजम्॥**

(भा. १/८/३६)

अनन्याश्च ये भक्तजनाः परमानन्दसमुद्रमग्नाः प्रत्यहं भवतां परमपावनं कीर्तनीयं लीलाकथाचरित्रं सानन्दं शृण्वन्ति गायन्ति स्मरन्ति ते धन्यतमाः। नित्ययुक्ताश्च ते महात्मानोऽविलम्बमेव भवप्रवाहोपरमं जन्ममरणात्मकभवबन्धनोच्छेदनकरं भवत्पदाम्बुजं प्रत्यक्षं पश्यन्तीति भक्तानां विश्वासभूमिः।

प्रायशोऽस्मिन्संसारे दृश्यत एव यदापत्सुमग्नाः क्लेशाक्रान्ताः आधिव्याधिजराग्रस्ताः भयशोकदुःखदौर्भाग्यपीडिता नराः सर्वापद्विनिवारणायैव प्रपन्नार्तिहरं हरिं स्मरन्ति सुखसौभाग्यावाप्तये। परन्त्वत्र माता कुन्ती स्वजीवने सर्वदा पदे पदे विपद एव भगवन्तं श्रीकृष्णं याचते। यथा –

**विपदः सन्तु नः शश्वत्तत्र तत्र जगद्गुरो।**
**भवतो दर्शनं यत्स्यादपुनर्भवदर्शनम्॥**

(भा. १/८/२५)

यतो हि कुन्ती विजानाति दृढं विश्वसिति च यत् सर्वज्ञः सर्वद्रष्टा सर्वव्यापी सर्वान्तर्यामी सदा सर्वत्राबाधगतिर्महाभुजः स्मृतिगामी भगवान् यत्र तत्र स्मरणादेव सद्यो भक्तरक्षणाय समायातीति सत्यमेवास्ति। तद्भगवद्दर्शनञ्चापुनर्भवदर्शनं (जन्ममृत्युभयनिकृन्तनं मोक्षप्रदं) भवतीति- **'हरिस्मृतिः सर्वविपद्विमोक्षणम्'** भागवत-धर्मस्य सुविश्रुतः सिद्धान्तो वरीवर्ति। अत्र कुन्ती-स्तुति-प्रसंगे वर्णिताः केचन रम्यतराः श्लोकाः प्रस्तूयन्ते प्रत्यहं पठनीयाः। यथा-

**कृष्णाय वासुदेवाय देवकीनन्दनाय च।**
**नन्दगोपकुमाराय गोविन्दाय नमो नमः॥**
**नमः पङ्कजनाभाय नमस्ते पङ्कजाङ्घ्रये॥**
**नमोऽकिञ्चनवित्ताय निवृत्तगुणवृत्तये।**
**आत्मारामाय शान्ताय कैवल्यपतये नमः॥**

अकिञ्चनानां निर्धनानां धनं प्रभुर्यः सर्वेश्वरः पद्मनाभो भगवान् वासुदेवो नन्दगोपकुमारो गोविन्दोऽविद्यामायाप्रपञ्चनिवृत्तः शान्तस्वरूपः कैवल्यमोक्षाधिपतिरात्मारामो विद्यते, कृष्णाय तस्मै नमः। एवमेव श्रीमद्भागवतान्तर्गतगजेन्द्रमोक्षस्तोत्रे निर्विशेषो निराकारो निर्गुणोऽपवर्गस्वरूपो भगवान्नारायणो गजेन्द्रेणैवं स्तूयते –

**तमक्षरं ब्रह्म परं परेश-**
**मव्यक्तमाध्यात्मिकयोगगम्यम्।**
**अतीन्द्रियं सूक्ष्ममिवातिदूर-**
**मनन्तमाद्यं परिपूर्णमीडे॥** (भा. ८/३/२१)

अविनाशी सर्वव्यापकः सर्वश्रेष्ठः परावरेशोऽव्यक्तोऽपि भक्तियोगगम्योऽतीन्द्रियः सन्निकटस्थोऽपि मायया्ऽऽवृतत्वात्सुदूरं प्रतीतोऽनन्तोऽनादिराद्यः स्वयम्भूः सर्वकारणकारणं परं ब्रह्म सर्वथा परिपूर्णो भगवानेव स्तुतस्ततोऽखिलदेवतात्मा सर्वभूतात्मभूतो हरिराविरासीत्। अन्ये च ब्रह्मादयो विविधलिङ्गभिदाभिमाना देवतास्तत्र नैवोपससृपुर्यतो हि भगवान्नारायणः सर्वजगतां परमा गतिरस्ति। तदा

गजेन्द्रश्च शंखचक्रगदापद्मधरं चतुर्भुजं गरुडारूढं भगवन्तं नारायणं दृष्ट्वा

**'उत्क्षिप्य साम्बुजकरं गिरमाह कृच्छ्रा-**
**न्नारायणाखिलगुरो! भगवन्नमस्ते'** (8.3.32)

इति नमो निवेद्यास्तौत्। प्रपन्नार्तिहरो भगवान् स्वचक्रेण विपाटितमुखाद् ग्राहाद् गजेन्द्रममूमुचदिति हरेरवतार-कथा-प्रसङ्गः सुविदित एवास्ति। शिक्षणीयञ्च तथ्यमस्त्यत्र यत्सर्वैरेवास्माभिर्नारायणपरैर्भाव्यम्।।

**नारायणपरा वेदा देवा नारायणाङ्गजाः।**
**नारायणपरा लोका नारायणपरा मखाः।।**
**नारायणपरो योगो नारायणपरं तपः।**
**नारायणपरं ज्ञानं नारायणपरा गतिः।।**
(भा. २/५/१५-१६)

सर्ववेदा देवा यज्ञा लोकाः सर्वे च ते भगवत्प्राप्तिहेतवो योगास्तपांसि सर्वञ्चाध्यात्मिकज्ञानविज्ञानं सर्व एव नारायणपरायणाः सन्ति। अन्ततः समस्त-साध्य साधनानां पर्यवसानं भगवति नारायण एव भवति। अतो हि- '**मूलं हि सर्वदेवानां विष्णुरिति** विज्ञायात्मयोनिः स्वयम्भूर्न्यासिनां परमा गतिर्नारायण एवोपास्यः,' '**तथैव सर्वार्हणमच्युतेज्या**' सिद्धान्तो विज्ञेयः।

।।श्रीकृष्णार्पणमस्तु।।

**- पूर्वप्राध्यापकः**
**छापर (चूरू)**
**मो. 9351226660**

राष्ट्रीय विचारों के लिए पढ़ें

पाञ्चजन्य साप्ताहिक



Voice of the Nation ORGANISER Weekly



हमारी विशेषताएं
- राष्ट्रीय दृष्टिकोण
- 7 दशकों से लगातार प्रकाशित
- संसद तथा विधानसभाओं को गुंजायमान करने वाली पत्रिकाएं
- विश्वसनीय, प्रतिष्ठित, दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में उपलब्ध
- ई-पेपर की सुविधा

You can subscribe पाञ्चजन्य / ORGANISER weeklies online through our Website : panchjanya.com, organiser.org

| वार्षिक ग्राहक शुल्क | पाञ्चजन्य ₹1450 (साधारण डाक द्वारा) | ORGANISER ₹1450 (by ordinary post) | विदेशों में $80 (विदेशों में हवाई डाक द्वारा) |
|---|---|---|---|

*रजिस्टर्ड डाक के लिए 1000 रुपए अतिरिक्त शुल्क

भारत प्रकाशन (दिल्ली) लिमिटेड
द एड्रेस, प्लॉट न. 4बी. डिस्ट्रिक्ट सेन्टर, मयूर विहार फेज-1 एक्सटेंशन, दिल्ली-110091 • ई- मेल : advt@bpdl.in

# तारोद्भवा वैखरी

[संस्कृतगज़्लिका]

❑ प्रो. ताराशंकरशर्मा पाण्डेयः

कास्ते कान्तिसमुज्ज्वलातिललिता तारोद्भवा वैखरी।
ताराभूतिभवादिमुख्यकविता सा शांकरी वैखरी।।1।।

शब्दार्थोभयसिद्धभावविशदा संश्रूयते वैष्णवी।
कण्ठोद्भूतनिनादशब्दजनिता वाणी खरी वैखरी।।2।।

वार्तालापपरैः परस्पररतैः या कथ्यते श्रूयते।
या वाग्दुःखसुखोदये च समये सा सार्थकी वैखरी।।3।।

मूलाधारपरा समाधिनिरतैः सन्ध्यायते योगिभिः।
पश्यन्ती हृदि मध्यमा च मतिगा कण्ठोद्गता वैखरी।।4।।

वाणी या प्रियताङ्गता सुमनसोःसा मित्रयोर्माधुरी।
भाषायां कटुतानुभूतिभरिता कष्टप्रदा वैखरी।।5।।

कान्तावाचमथो सुकान्तवचनं श्रुत्वा मनो मोदते।
वार्त्तायां सुमुखीजनुर्मधुमुखी सानन्ददा वैखरी।।6।।

पुण्यश्लोककवेर्विलासरसिता नोधारसोद्भाविता।
साहित्याम्बुधिमाधुरी सहृदयैरास्वाद्यते वैखरी।।7।।

कादाचित्कतया कलावकलिता ताराकृपाकारणात्।
विद्याश्लेषविधानतः प्रसरते मे शांकरी वैखरी।।8।।

- इति जयपुरवास्तव्येन राष्ट्रपतिसम्मानित- प्रतिनवबाणभट्ट- पण्डित- श्रीमोहनलालशर्मपाण्डेयात्मजेन श्रीकल्लाजीवैदिक-विश्वविद्यालय- कुलपतिना प्रोफेसर(डॉ.) ताराशंकरशर्मपाण्डेयेन प्रणीतं 'तारोद्भवा वैखरी' नाम गजलगीतिकाव्यं सम्पूर्णम्।

# भारतीपञ्चकम्

(मातरं त्वां श्रियं भारतीं भावये )

❑ नरेन्द्रमहर्षिः

वेदशास्त्रान्वयीं गानछन्दोमयीं,
चन्द्रमोभान्वयीं सूर्यतेजोमयीम्।
दृङ्मयीं वाङ्मयीं देववन्द्यां सदा,
मातरं त्वां श्रियं भारतीं भावये ॥ १ ॥

भुक्तिमुक्तिप्रदां शक्तिभक्तिप्रदां,
दैवदां नाददां सारदां शारदाम्।
गीतिदीप्तिप्रदां भावतीं पावनीं,
मातरं त्वां श्रियं भारतीं भावये ॥२ ॥

सुस्मितां शुभ्रहंसाधिरूढां शुभां,
संस्कृतां शुभ्रकर्पूरकुन्दप्रभाम्।
सुन्दरीं शुभ्रशीतांशुखण्डोज्ज्वलां,
मातरं त्वां श्रियं भारतीं भावये ॥३ ॥

शुभ्रवस्त्रान्वितां शुभ्रपद्मासनां,
पद्यगद्यात्मिकां कीर्तितां स्रग्विणीम्।
शम्भुना केन कृष्णेन सम्पूजितां,
मातरं त्वां श्रियं भारतीं भावये ॥४ ॥

वागधिष्ठातृदेवीं वसन्तप्रियां,
ग्रन्थबीजस्वरूपां विभां निर्मलाम्।
अन्धकारान्वितान्नः परिष्कुर्वतीं,
मातरं त्वां श्रियं भारतीं भावये ॥५ ॥

- **प्राध्यापकः** ( व्याकरणशास्त्रम्)
राजकीय-वरिष्ठ-उपाध्याय-संस्कृत-विद्यालयः,
हमीरगढ़म् (भीलवाड़ा) राजस्थानम्
दूरभाषः- 8107708847

# धनसञ्चयस्य अन्वेषणम्

❑ डॉ. योगिनी हिमांशु व्यासः

गुर्जरराजस्य सौराष्ट्रजनपदे जूनागढ़समीपे एकस्मिन् ग्रामे कृषकाणां निवासस्थानानि सन्ति। द्वौ वयस्यौ कृषिकार्ये व्यापृतौ स्तः। तौ स्वक्षेत्रे गोधूम-चणक-तण्डुल-यव-प्रियंगु-मसूर-मुद्गफलादीनां कृषिं कुरुतः। रामलालस्य द्वौ उत्साहशीलौ पुत्रौ नित्यं कृषिकार्ये पितुः साहाय्यं कुरुतः। तदा श्यामलालस्य त्रयः पुत्राः आलस्यशीलाः उद्योगविमुखाः च सन्ति। ते निद्रया कलहेन च दिनानि यापयन्ति। अतः श्यामलालः सर्वदा पुत्राणां भाविजीवनविषये चिन्ताग्रस्तः एव भवति।

एकदा सः स्वभार्यां पूर्णिमाम् अकथयत्-मया श्रुतम् अस्ति यत्-

**एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्।**
**सहैव दशभिः पुत्रैर्भारं वहति गर्दभी।।**
**एकेनापि सुपुत्रेण जायमानेन सत्कुलम्।**
**शशिना चैव गगनं सर्वदैवोज्ज्वलं कृतम्।।**

ईश्वरकृपया आवयोः परिवारे त्रयःपुत्राः सन्ति। किन्तु एकोऽपि पुत्रः उद्यमशीलः, हिताहितविवेकी च नास्ति। एतान् निरुद्यमान् पुत्रान् दृष्ट्वा मम हृदि अतीव सन्तापः जायते। मम मृत्योः पश्चात् एते किं करिष्यन्ति? इति विचारेण रात्रौ निद्राऽपि न आयाति। तस्य वचनं श्रुत्वा पूर्णिमा अवदत्- 'शनैः शनैः ते अवश्यं परिश्रमं करिष्यन्ति। चिन्तां मा कुरु।' यतः

**'चिन्तायाश्च चितायाश्च, बिन्दुमात्रं विशिष्यते।**
**चिता दहति निर्जीवं चिन्ता दहति जीवनम्।।'**

समयः व्यतीतः। किन्तु पुत्रेषु किमपि परिवर्तनं न आगतम्। एकदा श्यामलालः व्याधिग्रस्तः जातः। चिरकालपर्यन्तं सः स्वस्थः न अभवत्। अतः सः पूर्णिमाम् अकथयत्- हे पूर्णिमे! आवयोः पुत्रान् आह्वय। शीघ्रं सा पुत्रान् तत्र आमन्त्रयत्। पिता अवदत्- 'भो पुत्राः! अधुना अहं बहुदिवसपर्यन्तं मम शरीरयात्रां न वहिष्यामि। अहं युष्माकं भविष्याय चिन्तितोऽस्मि। मया जीवनपर्यन्तं यद् उपार्जितम्, तत् द्रव्यसञ्चय अस्माकं क्षेत्रस्य ऊर्ध्वभागे मया गुप्तरूपेण निक्षिप्तोऽस्ति। मम मरणस्य पश्चात् तं द्रव्यसञ्चयम् उद्धृत्य संविभागं कृत्वा जीवनं यापयन्तु। पितुः वचनं श्रुत्वा सर्वेऽपि प्रसन्नाः जाताः।

मासादूर्ध्वं श्यामलालस्य स्वर्गवासः अभवत्। दिनेषु गच्छत्सु पुत्रैः क्षेत्रस्थाने वा क्षेत्रप्रदेशे द्रव्यसञ्चयस्य अन्वेषणाय बहुपरिश्रमः कृतः। क्षेत्रसमग्रस्य भूमिः खनिता किन्तु किञ्चिदपि न प्राप्तम्। गृहमागत्य ते सर्वे मातरं अकथयन्- हे मातः! अस्माकं पिता असत्यम् उक्तवान् आसीत्। तस्मिन् क्षेत्रे न कोऽपि द्रव्यसञ्चयः। तदा माता अवदत्- भो पुत्राः! युष्माकं पित्रा जीवनपर्यन्तं महता परिश्रमेण इदं गृहं क्षेत्रं च अर्जितमस्ति। किन्तु अधुना तु युष्माभिः क्षेत्रं खनितं तदा तस्मिन् बीजानि अपि वपत। मातुः वचनं स्वीकृत्य तैः बीजानि वपितानि जलसिंचनमपि कृतम्। पञ्चमासादूर्ध्वं शस्यकर्त्तन-समयोऽपि सञ्जातः। शस्यसंग्रहणं कृत्वा पण्यफलत्वेन अपूर्वरचिता आयविवृद्धिर्जाता। यथाशीघ्रं ते गृहे मातुः समीपम् आगच्छन्। जननी स्नेहपूर्वकम् अवदत्- भो पुत्राः! युष्माकम् परिश्रमः एव यथार्थः धनसञ्चयः वा वास्तविकः धनराशिः अस्ति। युष्माकम् पिता युष्मान् बोधयितुम् इच्छति स्म यत्-

**उद्योगः खलु कर्त्तव्यः फलं मार्जारवद्भवेत्।**
**जन्मप्रभृति गौर्नास्ति पयः पिबति नित्यशः।।**

सर्वे पुत्राः सम्मिल्य मातरम् अकथयन्- भो मातः। कृषेः महत्त्वम् इदानीमेव अस्माभिः ज्ञातमस्ति।

# भासतां काव्यदीपप्रभा भारते

❑ डॉ. प्रीति आर. पुजारा

या प्रभा भास्वरा भारतीभाविता
या तुरीया शुभा पापतापापहा।
शब्दशृंगारनानादिभी राजिता
भासतां काव्यदीपप्रभा भारते।।१।।

तेजयन्ती कवीनां गिरं शाम्भवी
द्रावयन्तीव जाड्यान्धकारं घनम्।
विश्वकल्याणकार्यान्विता संसृतौ
भासतां काव्यदीपप्रभा भारते।।२।।

ब्रह्मविद्यागमं दर्शयन्ती प्रभा
विद्वदामोदिनी भारतीकन्यका।
मञ्जुला मन्दहासा कवीनां रमा
भासतां काव्यदीपप्रभा भारते।।३।।

शोकपर्याकुले विषण्णे मानसे
संभरन्ती प्रियाप्रेमसोमं मुदा।
उज्ज्वला चन्द्रिका विश्वसम्मोहिनी
भासतां काव्यदीपप्रभा भारते।।४।।

आभया शुभ्रया काव्यदीपस्य हे!
भास्करो मन्दछायस्स्वयं भासते।
कल्पनासुन्दरी जागरा मानसे
भासतां काव्यदीपप्रभा भारते।।५।।

अङ्गनानां कदा वेणिबन्धं सितं
रक्तबिम्बाधरं भ्रूविलासान् कदा।
मेखलां नूपुरं लोलितं कुण्डलं
भासतां काव्यदीपप्रभा भारते।।६।।

निर्मलेयं प्रभाऽऽपावृणन्ती यथा
वायसानां चरित्रं पिकानां तथा।
निर्भया निश्चला सत्यसंश्लेषिता
भासतां काव्यदीपप्रभा भारते।।७।।

कृष्णगीतध्वनिं नादयन्ती प्रभा
कर्षयन्ती युगाद् राधिकां वेणुभिः।
गोपिकाः श्लेषया नन्दयन्ती शुभा
भासतां काव्यदीपप्रभा भारते।।८।।

**– सहायकाचार्या, संस्कृतविभागे,**
डी.सी.एम. कला-वाणिज्यमहाविद्यालयः
वीरमगाम-अहमदाबाद-गुजरात

# ज्योतिषशास्त्रस्य त्रिस्कन्धत्वम्

❑ देवेन्द्रकुमारशर्मा

**अचिन्त्याव्यक्तरूपाय निर्गुणाय गुणात्मने।**
**समस्तजगदाधारमूर्तये ब्रह्मणे नमः।।**

किं नाम ज्योतिषमिति विचिकित्सायां प्रकाशपुञ्जानि अधिकृत्य कृतं शास्त्रं ज्योतिषम्। ज्योतिषं ज्योतिर्जुषाम् सूर्यादिग्रहाणां बोधकं शास्त्रं ज्योतिषशास्त्रम्। ज्योतींषि प्रतिपाद्यन्ते यस्मिन्नित्यर्थे 'अर्शादिभ्योऽच्' इति सूत्रेण ज्योतिषशब्दो निष्पद्यते, यद्वा द्योत्यन्ते प्रकाश्यन्ते ग्रहनक्षत्रादीन्यनेनेत्यर्थे 'द्युतेरिषन्नादेश्च जः' इत्युणादि-सूत्रेण ज्योतिषशब्दस्य निष्पत्तिर्भवति। अनेन प्रकारेण सिद्ध्यति यद् ग्रहनक्षत्राणां गतिस्थितिमित्यधिकृत्य कृतं शास्त्रं ज्योतिषशास्त्रमित्युच्यते अर्थात् ग्रहनक्षत्र-ताराधूमकेतूल्कादीनां स्थितिगतिपरिभ्रमणकालादीनां निरूपणं कालस्य मूर्तामूर्तभेदेन विवेचनं यज्ञादीनां निरूपणं यज्ञादीनां सम्पादनाय कालस्य निर्धारणञ्च यत्र भवति तदेवास्ति ज्योतिषशास्त्रम्।

प्रायः शास्त्रेषु 'ज्योतिष', 'ज्यौतिष' इत्यनयोः द्वयोः शब्दयोः प्रयोगः परिलक्ष्यते। द्युत् धातोः 'इसुन्' प्रत्ययेन ज्योतिरिति शब्दः निष्पद्यते। द्योतते द्युत्यते वा इति विग्रहेण प्रथमन्तु ज्योतिः नक्षत्रादीन्यधिकृत्य कृतं शास्त्रं ज्योतिषं विभक्तिकार्ये ज्यौतिषमिति। तत्र द्वितीयम् 'अर्शादिभ्योऽच्' इति अचि अनुबन्धलोपे विभक्तिकार्ये ज्योतिषमिति। ज्योतींषि नक्षत्रादीनि विवेचकत्वेन विविच्यविषयत्वेन वा सन्ति यस्मिन् शास्त्रे तच्छास्त्रमिति विग्रहेण प्रथितम्। अनयोर्द्वयोः शब्दयोः व्युत्पत्त्या प्रतीयते यन्नक्षत्रादीनां सर्वासां स्थितीनां बोधक- शास्त्रञ्ज्योतिषशास्त्रमिति। ज्योतिषशास्त्रस्यैकाऽन्याऽपि व्युत्पत्तिर्वर्तते यत् - 'ज्यौतिषां सूर्यादिग्रहाणां बोधकं शास्त्रमिति'[1]।

कथनस्याभिप्रयोऽयं वर्तते यद् यस्मिन् शास्त्रे सूर्यादिग्रहाणां गतिसम्बन्धिनः सर्वे नियमाः विविच्यन्ते तथा च तेषां ग्रहाणां भौतिकपदार्थेषु यः प्रभावो विद्यते, तस्य यत्र वैज्ञानिकरीत्या विवेचनं दरीदृश्यते तच्छास्त्रं ज्योतिषशास्त्रमिति।

यज्ञकर्मणि कालस्यावश्यकता भवति। केवलं कालस्य समीचीनं ज्ञानं ज्योतिषशास्त्रेणैवोपलभ्यते। यतो हि वेदा यज्ञकर्मप्रवृत्ताः यज्ञाश्च **'वसन्ते ज्योतिषां यजेत' 'पौर्णमास्यां यजेत'** इत्यादिवेदवाक्यैस्ते कालाधीनाः। यतो ह्यस्माच्छास्त्रात् कालज्ञानं सम्यक्तया भवति, अतोऽस्य शास्त्रस्य वेदाङ्गत्वमुक्तम्[2]। केवलञ्ज्योतिषशास्त्रादेव सम्यक् कालज्ञानं भवति, अतोऽस्य ज्ञानस्य वेदाङ्गत्वमाचार्येण भणितम्[3]। ज्यौतिषशास्त्रमिदं यतो वेदस्य चक्षुरित्यभिधीयतेऽ-तोऽङ्गमध्येऽस्य प्राधान्यमङ्गीक्रियते इति शास्त्रस्यास्य वरिष्ठतां प्रतिष्ठां च प्रतिपादयता आचार्य**लगध**मुनिना निगदितम्[4]।

वेदाङ्गेषु कालविज्ञानात्मकस्यास्य शास्त्रस्य प्राधान्यस्येदमप्यस्ति कारणं यदत्र प्रत्यक्षानुमिति-युक्तिरूपोपपत्तिरिति प्रमाणचतुष्टयमङ्गीक्रियते। अन्येषु वेदाङ्गशास्त्रेषु शब्दस्य प्रामाण्यत्वादासत्वे च विवादस्याऽवसरः समुदेति। अनेनैव कारणेन

भारतीयदर्शनेषु वैविध्याङ्गविवादश्च दृश्यतेऽनुभूयते च। तत्र केचिदास्तिकाः केचन नास्तिकाः, केचिद् बोद्धाः कतिचिज्जैना वा सन्ति सर्वेऽपि स्वात्मनि विश्वसन्ति।

तेषां विचारसरणिः, तत्त्वप्रतिपादनं प्रमाणानि च भिन्नानि – भिन्नानि सन्ति, किन्तु ज्यौतिषशास्त्रे प्रत्यक्षादेर्विरुद्धानि ऋषिवाक्यान्यपि प्रामाण्यत्वेन नाङ्गीक्रियन्ते। अत एवाऽत्र तादृशस्य विवादस्याऽवसरो नायाति।

इत्थं वयं पश्यामः यज्ज्यौतिषशास्त्रे प्रत्यक्षादीनां प्रामाण्यत्वादनेन शास्त्रेण यस्मिन् दिने ऋतुविज्ञानस्य पूर्वानुमानं ग्रहणादीनां या भविष्यवाणी विधीयते सा तु प्रत्यक्षरूपेण दरीदृश्यते, अतोऽत्राऽन्यवेदाङ्ग-शास्त्रवत् तादृशो विवादो नोत्पद्यत इति। अत एव वेदाङ्गशास्त्रेषु ज्यौतिषशास्त्रं महत्त्वपूर्णं स्थानं भजते। सामवेदं विहाय प्रत्येकवेदस्य पृथक्-पृथक् ज्यौतिषमासीत्। यथा[5]

**1. ऋग्वेदज्यौतिषम् - षट्त्रिंशत्पद्यात्मकम्।**

**2. यजुर्वेदज्यौतिषम् - एकोनचत्वारिंशत्पद्यात्मकम्।**

**3. अथर्ववेदज्यौतिषम् - द्विषष्ट्युत्तरशतपद्यात्मकम्।**

एतेषां त्रयाणां ज्यौतिषशास्त्राणां प्रणेता आचार्यः **लगध** एवास्ति। शास्त्रस्यास्य त्रयो विभागाः सन्ति। सिद्धान्तसंहिताहोरास्कन्धत्रयात्मकमस्तीति केचन विद्वांसः जातक-गोल-निमित्त-प्रश्न-मुहूर्त्त-गणितश्च प्रभेदैः त्रिस्कन्धात्मकज्योतिषशास्त्रस्य षड्भेदान् कृतवन्तः। यथोक्तम्-

**स्कन्धत्रयात्मकं ज्योतिश्शास्त्रमेतत् षडङ्गवत्**
**गणितं संहिता होरा चेति स्कन्धत्रयं मतम्।**
**जातकगोलनिमित्तप्रश्नमुहूर्त्ताख्यगणितनामानि**
**अभिदधतीह षडङ्गान्याचार्या ज्यौतिषे**
**महाशास्त्रे**[6]**।।**

यदि षट्स्कन्धात्मकज्योतिश्शास्त्रस्य विश्लेषणं क्रियते चेत् मनोविज्ञानम्, अन्तरिक्षविज्ञानं, वास्तुविज्ञानं, वृष्टिविज्ञानं, भूविज्ञानं, भूगर्भविज्ञानं, सृष्टिविज्ञानं, जीवविज्ञानं, पदार्थविज्ञानं, रसायनविज्ञानं, भौतिकविज्ञानं चिकित्साशास्त्रञ्चास्मिन्नेव शास्त्रेऽन्तर्भूतानि सन्ति।

**त्रिस्कन्धात्मकज्योतिषशास्त्रस्य परिचयः-**

प्राचीनाचार्याणामनुसारं मुख्यतया ज्यौतिषशास्त्रस्य द्वौ विभागौ गणितफलितौ भवतः। केषाञ्चिदाचार्याणामनुसारं सिद्धान्त-संहिता-होरा-शकुन-प्रश्न-प्रभेदैः अस्य पञ्चभेदाः स्वीकृताः। केषाञ्चिदाचार्याणामनुसारं जातक-गोल-निमित्त-प्रश्न-मुहूर्त्त-गणितप्रभेदैः त्रिस्कन्धात्मकज्योतिषस्य पूर्वोक्ताः षड्भेदाः स्वीकृताः सन्ति[7]।

एवमनेकभेदयुक्तस्यास्य शास्त्रस्य प्रमुखस्कन्धत्रयं सर्वैः आचार्यैः स्वीक्रियते। **यथोक्तं वराहमिहिरेण -**

**ज्योतिः शास्त्रमनेकभेदविषयं**
**स्कन्धत्रयाधिष्ठितम्,**
**तत्कात्स्न्र्यौपनयस्य नाम मुनिभिः**
**सङ्कीर्त्यते संहिता।**
**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्-**
**तन्त्राभिधानस्त्वसौ,**
**होरान्योऽङ्गविनिश्चयश्च कथितः**
**स्कन्धस्तृतीयोऽपरः**[8]**।।**

**सिद्धान्तः-**

त्रुट्यादितः प्रलयान्तं यः कालः तस्य कलनं, मानानां सौरचान्द्रादिमानानां प्रकर्षेण विचारः व्यक्ताव्यक्तात्मकं गणितं द्विधा, उत्तरेण सह वर्तमानाः समाधानयुक्ताः प्रश्ना भूधिष्ण्यानि ग्रहाश्च तेषां या संस्थितिस्तस्याः निरूपणं, कालज्ञानसाधनभूतानि यन्त्राणि च यत्रोच्यते स बुधैः सिद्धान्त उदाहृतः ।

इत्थं च यत्र गणितबन्धेन खेटगतयः विचार्यन्ते तत् सिद्धान्तलक्षणम् ।यथा-

**त्रुट्यादिप्रलयान्तकालकलना मानप्रभेदः क्रमा-
च्चारश्च द्युसदां द्विधा च गणितं प्रश्नास्तथा सोत्तराः ।।
भूधिष्ण्यग्रहसंस्थितेश्च कथनं यन्त्रादि यत्रोच्यते
सिद्धान्तः स उदाहृतोऽत्र गणितस्कन्धप्रबन्धे बुधैः[9] ।।**

उत्तरमध्यकाले (१००१ ई. १६००ई.) गणितस्य सिद्धान्त - तन्त्रकरणानीति त्रयः भेदाः प्रकटीभवन्ति।

**सिद्धान्तः-** यत्र कल्पादित इष्टदिनपर्यन्तमहर्गणं निर्मीय ग्रहानयनं क्रियते तदेव सिद्धान्त उच्यते।

**तन्त्रम्** - यत्र युगादितः इष्टदिनपर्यन्तमहर्गणं निर्मीय ग्रहगणितं क्रियते तदेव तन्त्रमुच्यते।

**करणम्** - यत्र शकादितोऽहर्गणानयनं कृत्वा ग्रहगणितं क्रियते तदेव करणमिति उच्यते।

**संहिता -**

सुभिक्षदुर्भिक्षादिसार्वभौमफलप्रतिपादकं शास्त्रमिदं संहिता। संहितायां बहूनां विषयाणां सम्यगाहृत्यैकत्र विशदं वर्णनं वर्तते। यथा संहिताशब्दव्युत्पत्तिर्वदति सम्-सम्यक् प्रकारेण धा=डुधाञ् धारणे धातोर्निष्ठायां क्तप्रत्यये 'दधातेर्हिः' इति सूत्रेण 'हि' इत्यादेशे स्त्रीत्वविवक्षायां टापि 'संहिता' इति। तेन ऋग्वेदसंहिता यजुर्वेदसंहिता सामवेदसंहिता-अथर्ववेदसंहिता-चरकसंहिता-सुश्रुतसंहिता- गर्गसंहिता-प्रभृतयो ग्रन्थाः दृष्टिपथमायान्ति। दृश्यन्ते च यथार्थपुरस्सरं वेदसंहितासु नानाविधा आध्यात्मिकाधिदैविकाधि-भौतिकभूगोल-खगोलादिसामग्र्यः। यथा वेदसंहितासु बहूनां विषयाणां सम्यगाहृत्यैकत्र विशदं वर्णनं समुपलभ्यते तथैव संहिताग्रन्थ औपयोगिकानां ज्यौतिषायुर्वेदशाकुनिकौत्पातिक-शान्तिक-पौष्टिक-वृक्षायुर्वेद - देहस्पन्दनस्वप्न - धार्मिकाध्यात्मिक-भौगोलिकैतिहासिकादि- विविधविचित्र-विलक्षण-विषयाणां सन्निवेशोऽस्ति। स्कन्धत्रयेषु गणितस्कन्ध-स्यैकदेशेन सह वर्तमानाः सगणितस्कन्धैकदेशाः जातकसंहिताः।

प्रतिष्ठापनवृक्षायुर्वेदोदकार्गलनीराजनखञ्जनकोत्पात-शान्तिमयूर-चित्रकधृतकम्बल-खड्गपट्टककृवाकुकर्म**गोऽजाश्व**भपुरुषस्त्री-लक्षणान्यन्तःपुरचिन्तापिटकलक्षणोपानच्छेद-वस्त्रच्छेदचामर-दण्डशनाऽऽसनलक्षणरत्नपरीक्षाः दीपलक्षणं दन्तकाष्ठाद्याश्रितानि शुभाऽशुभानि निमित्तानि सामान्यानि च जगतः प्रतिपुरुषं पार्थिवे च प्रतिक्षणमनन्यकर्माभियुक्तेन दैवज्ञेन चिन्तयितव्यानि। न चैकाकिना शक्यन्तेऽहर्निशमवधारयितुं निमित्तानि। तस्मात् सुभृतेनैव दैवज्ञेनान्येऽपि तद्विदश्चत्वारि कर्तव्यानि। तत्रैकेनैन्द्री चाग्नेयी च दिगवलोकयितव्याः। याम्या नैर्ऋती चान्येनैवं वारुणी वायव्या चोत्तरा चैशानी चेति। यस्मादुल्कापातादीनि शीघ्रमपगच्छन्तीति तस्याश्चाकारवर्णस्नेहप्रमाणादिग्रहर्क्षोपघातादिभिः

फलानि भवन्ति।

**होराः –**

होरार्थं शास्त्रं होरा तामहोरात्रविकल्पमेके वाञ्छन्ति। अहश्च च रात्रिश्चाहोरात्रम् होराशब्देनोच्यते। अहोरात्रशब्दस्य पूर्वो वर्णोऽकारोऽपरवर्णश्च त्रकारस्तयोर्लोपमदर्शनं कृत्वा होराशब्दोऽवशिष्यते। किमर्थं? पुनरहोरात्रशब्दो व्युत्पाद्यते इति। मेषादयो द्वादशलग्नराशयोऽहोरात्रान्तर्भूताः लग्नस्य च कालवशाज्ज्ञानं लग्नवशाच्छुभाशुभज्ञानम्। अतोऽहोरात्राख्यत्वात्तत एव होराशब्दो व्युत्पाद्यते। एतदेवाचार्यस्याप्यभिप्रेतम्। वराहेणोक्तं तद्यथा–


**होरेत्यहोरात्रविकल्पमेके**
**वाञ्छन्ति पूर्वापरवर्णलोपात्।**
**कर्मार्जितं पूर्वभवे सदादि**
**यत्तस्य पक्तिं समभिव्यनक्ति**[10]**॥**

– शोधार्थी, ज्योतिषविभागः,
ज.रा.रा.संस्कृतविश्वविद्यालयः, जयपुरम्।

**टिप्पणी-**

1. सिद्धान्तशिरोमणिः,ग्रा.म.का.श्लो.१०
2. वेदा हि यज्ञार्थमभिप्रवृत्ता, कालानुपूर्वा विहिताश्च यज्ञाः। तस्मादिदं कालविधानशास्त्रं, यो ज्योतिषं वेद स वेद यज्ञान्॥(याजु, ज्यो. श्लो.३)
3. छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते,
   ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
   शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
   तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥
   (पाणिनीयशिक्षा-श्लो ४१-४२)
4. यथा शिखा मयूराणां नागानां मणयो यथा
   तद्वद्वेदाङ्गशास्त्राणां ज्यौतिषं मूर्धिन संस्थितम्
   (मु.चि. 1.२ पी.धा.टी.)
5. भा.ज्यौ.शंकरबालकृष्णः, पृ.सं. ९४-१३९)
6. प्रश्नमार्गः-अ.१ श्लो.५,६)
7. प्रश्नमार्गः- अ.१ श्लो. १
8. बृहत्संहिता-उ. श्लो.१
9. सिद्धान्तशिरोमणिः-ग्रा.म.का.श्लो.१०

# सादरं श्रद्धाञ्जलिः



( जन्म 24.06.1943 - निधनं 10.03.23 )

'भारती' संस्कृत-मास-पत्रिकाप्रकाशिकायाः 'भारतीय-संस्कृत-प्रचार-संस्थानम्, राजस्थानम्' इति संस्थाया **अध्यक्षाः**, अथ च राजकीय-महाराज-संस्कृत-कॉलेजस्य (जयपुरस्थस्य) **दर्शनविभागाध्यक्षचराः** प्रोफेसर- **शङ्करप्रसादशुक्ल**-महोदयाः 10 मार्च, 2023 दिनाङ्के मध्यरात्रौ जयपुरे दिवम्प्रयाता इति दुःखप्रदो वृत्तान्तः।

एभिर्महानुभावैः संस्कृतभाषायाः सेवार्थं समग्रं जीवनं समर्पितम्। 'भारती'-संस्कृत-मास-पत्रिकापरिवारोऽस्मै मनीषिणे हार्दान् श्रद्धाञ्जलीन् समर्पयति।

**– सम्पादकः**

क्रमशः

# पराम्बाकृपाकाङ्क्षा

❑ डॉ. रामनारायणझाः

( ६५ )

मेदिन्यां बहवो मतास्सुभजतां मायाविनां नित्यशः
पन्थानोऽपि सहस्रशश्श्रुतिपथं त्यक्त्वा हि सन्तीति हा।
ब्रह्मिष्ठा गुरवो भवन्ति विदुषां वेदान्तविद्यावतां
प्रज्ञाऽऽम्नायविदास्सदातिविमलाः कृष्णात्मवादंवशाः।।

( ६६ )

माया मुह्यति मायिनन्नु महती जीवं ह्यधीनं हि सा
येनासौ वनितानुमूर्च्छतितरां मुद्राभटं जारजम्।
जाल्मं दानवकृत्यकारिजनतां देहात्मसंवादिनी-
मादौ नाशय ते सुविन्दतितमाँश्लिक्ष्यं निजं मोदते।।

( ६७ )

आत्मम्मन्यतमा वदन्ति जनताः प्रेते च शून्यं जगत्
यच्छक्यं परिभुज्यतामिह सुखं कुत्रात्मतत्त्वं पुनः।
सर्वं नश्वरमेवमेव वचतां व्रातो वनीवच्यते
लोकाँल्लोकहितान्नु सत्यमपि सोऽद्योशं स्वयं मन्यते।।

( ६८ )

दम्भी वेदमतान् विनाश्य विधिना नैजेन नूनं नवान्
संस्थाप्याशु विमुह्यतीति जनताः लुण्ठन्नु चैवानुगः।
मान्यानद्य न सुन्दरानपि ततस्सर्वाञ्च मोहंवशः
साधूनां किल बावरोऽहमिति यो नूनं स मिथ्याम्बरः।।

( ६९ )

वेदो वन्द्यतमो विशालहृदयो नीडं दयायाश्शुभः
शुद्धस्सत्यशिवावहो निरयहा नारायणो नित्यकः।
विज्ञानो विमलस्सुसंस्कृतिकरः सत्यार्थसंकाशकः
तापत्राससमूलनाऽनुशमनश्चेष्टर्यन्ति तस्मै जडाः।।

( ७० )

ब्रह्मा चापि न वेद जन्मनि यदाऽऽम्नायं स तस्मै हरिः
प्रादात्तं विधिवद् हृदाऽऽदिकवये मुह्यन्ति यत्सूरयः।
ब्रूते भागवतं प्रमाणविमलं व्यासोक्तविज्ञानदं
जानीयान्नु कोऽद्य तं पुनरहो सत्यं गदानीति किम्?।।

( ७१ )

प्रामाण्यं जुषतां सनातनमिदं मन्तव्यमाशूहया
प्राणः प्रेष्ठतमोऽस्ति वेद सकलो वेद्योऽद्य गेयोऽपि वा।
श्रेयोदस्सुधियां विमत्सरमयो निर्मत्सराणां सता-
माद्यं काव्यमहन्नु विद्धि महतां विज्ञानविज्ञापकम्।।

( ७२ )

कर्मोपासनबोधवेदनपरं मन्तव्यमेतत्त्रयन्-
तत्रोपासनमात्मनोपनिषदामों श्रेयसे सर्वथा।
प्रेयः कर्म ददाति तद्धि कुरुते जीवोऽखिलो मोहितो
मुग्धो बद्धतमोऽर्भकोऽतिविमलो निश्श्रेयसं चेप्सति।।

( ७३ )

निःश्वासोऽपि हरेरयं निगदितश्चाम्नायविद्यारुणो
धर्मो वाखिल एव सत्यसहितो विश्वस्य मूलं हितः।
सर्वं वस्तु ततस्सनातनतमं तथ्यं च तत्त्वं ततं
नित्यं सिध्यति शाश्वतं रे सुधयः! तद्धि सदोपास्यताम्।।

( ७४ )

भूमा यः किल साध्यति प्रमुखतश्श्रेयो हि साध्यं ततश्-
चेशावास्यमयं चराचरमिदं त्यक्तेन भोग्यं जगत्।
भोज्यञ्चापि सुकर्म मर्म सततं मीमांस्यमेतद् मुदे
जिज्ञास्यं न विनश्वरं तदिह यद् ब्रह्मेति वैदान्तिकम्।।

( ७५ )

प्रज्ञानं किल वस्तु वास्तवमिदं वेद्यान्तरैर्वर्जितम्-
ब्रह्मैवोम्परमात्मवस्तु बृहतो वेद्यं बृहद्यद्धि तत्।
भर्गोऽयं महतो महाँश्च परमात्मा वै नु भूमा भग-
वानथैव विवित्सया च परया सम्यक्तया ज्ञायताम्।।

( ७६ )

द्रष्टव्यं किल चात्मतत्त्वमिदकं श्रोतव्यमादौ ततो,
मन्तव्यं च निरस्तदोषकुहकैर्ध्यातव्यमेवेति नः।
ज्ञातव्यं च पुनः पुनश्च बहुधाऽऽम्नायार्थगम्यं हि तत्
शक्त्या मातुरिदं सुसम्भवतरं सत्यं सदाऽऽनन्दितम्।।

( ७७ )

वाचो यन्ति न यत्र तद्विमनसा साकं सखे! बोध्यतां
सत्यं ज्ञानमनन्तरूपणवतां धामाशु वेदात्मनाम्।
यद्गत्वा न निवर्तते तदपि भो! मे धाम चेतोगतन्-
गन्तुन्तत्र मनोमनाः नु यतते मातः! कृपाम्मे कुरु।।

( ७८ )

तत्त्वं चासि महद्धि वाक्यमनिशं ब्रूते च वेदोऽखिलम्
तत्तथ्यं परिमृश्य चेत चतुरं स्वान्तं मदीयं स्वयम्।
किन्त्वन्नेहनमेष्यसीति! वद रे! मुक्तार्थमेतच्च मां
मुक्तो मेति नु भूः तथापि भज तत् प्राप्तासि देहम्मनोः।।

( ७९ )

तत्त्वन्तत् त्रिविधं परं सुविदितैः वेदार्थवेदान्तगैः
वेदैश्चापि पुरः पुरो मनुजुषामुक्तम्मतं ध्यायताम्।
जीवो ब्रह्म ततश्च शक्तिरथ भो नित्यं मया मृश्यतां
वारं वारमिंद वृतं यदिह तत्स्वान्तेन दान्तेन वा।।

( ८० )

नित्ये द्वे जडतामुपैति विदिते माया च या शक्तिका
कृष्णा सा किल शुक्लिकाश्रुतिगता या लोहिता चैकिका।
अव्यक्ता प्रकृतिः ह्यजा परितता मोहाख्यमाया च या
अज्ञानन्तमसावृतानुवरिका रूपावृता नामतः।।

( ८१ )

भासा नश्यति चैकतो ह्यपरतस्सत्ता च तस्या नहि,
बालो भ्राम्यति भाति केतनमिदं रज्ज्वौ नु सर्पो यथा।
माया जालवती विभीषयति वै विश्वं भिया सर्वतो
निर्भीतिःप्रथिता हि मुक्तिरनिशं मातुः कृपातो भवेत्।।

( ८२ )

मिथ्याऽऽभासमयी प्रभाति सदसद्भ्यां जाल्मिकाऽनिर्वचा
बोध्या सा नहि चेन्द्रजाललतिका या वा भ्रमीतितमाम्।
सर्वत्रैव विमोहयत्सुगरला लेलायते माधवी-
व प्रेष्ठेव दुनोति नो नु निरये प्रक्षेपयन्ती सदा।।

( ८३ )

आभासः किल यो यथा नहि तथा ध्वान्तं सदा वर्तते
मिथ्येव श्रुतयो गदन्ति विमला चास्तीति नास्तीति वा।
भावाद् भाव इवास्ति चाऽभवनकाद् भावः कथं संभवेत्
काशो यत्र न वर्तते तदिह भो! भ्रान्तं तमो विद्यते।।

( ८४ )

द्योतेऽपीह तमोऽस्ति चेत्किमथ तद् दृश्येत यत्रःकथ-
मेतेनैव न बुध्यतेऽद्य मयकाऽऽभासस्तमो यो हि तत्।
अस्तेर्भूरिति सच्च भाव इति वै निष्पाद्यते शास्त्रतो
ज्ञात्वैतद्विबुधैर्बुधैश्च नियतं मुच्येत दुःखार्णवात्।।

- दूरभाषाङ्काः ९४१४७७३७१९

# सभ्यता संस्कृतिश्च

❑ डॉ. कैलाशचन्द्रबुनकरः

**संस्कृतिः-** संस्कृतिःमानवस्य आध्यात्मिक-नैतिकमूल्यानां सूचिका वर्तते। संस्कृतिशब्दः सम्उपसर्गपूर्वकात् कृधातोः क्तिन्प्रत्यये (सम्+कृ+क्तिन्) सम्पद्यते। संस्कारशब्दे संस्कृतशब्दे चायमेव धातुरुपसर्गश्च विद्येते। अस्यार्थः वर्तते शुद्धं, परिमार्जितमिति। येषां गुणानामाधारे व्यक्तेरात्मा मनश्च परिमार्जितं तौ उत्कृष्टतोन्नतिं प्रति अग्रसरतः सा संस्कृतिः इति। 'संस्कुरुते मानवान् उच्चतां, श्रेष्ठतां, नैतिकतां आत्मिकविकासं प्रति अग्रेसारयति। मानवमात्रस्य कल्याणकारिणी संस्कृतिरियं वेद एव निहिता।

स्वयं वेदः कथयति -

**अच्छिन्नस्य ते देव सोम सुवीर्यस्य**
**रायस्पोषस्य ददितारः स्याम।**
**सा प्रथमा संस्कृतिर्विश्ववारा**
**स प्रथमो वरुणो मित्रोऽग्निः ।। ( यजु. 7/14 )**

संस्कृतिः संस्काराश्रिता भवति तेषां संस्काराणां माध्यमेन सा अग्रेसरति। आंग्लभाषायां संस्कृतेः पर्यायवाची शब्दः कल्चर (culture) इति। ऑक्सफोर्ड एतन्नामके शब्दकोषे अनेन प्रकारेण परिभाषितम्।

संस्कृतिः मानवं पशुत्वमतिक्राम्य वास्तविकमनुष्यं करोति। सा मनुष्यं बौद्धिकं, मानसिकं, आत्मिकं च वैशिष्ट्यं प्रददाति। डॉ. सम्पूर्णानन्दानुसारं संस्कृतिः सा आधारशिला वर्तते यामाश्रित्य समाजस्य देशस्य च विशालः भव्यप्रासादः निर्मितो भवति।

लक्ष्मणशास्त्री जोशी संस्कृतेःपरिभाषां निम्नानुसारं करोति-संस्कृतिः वस्तुतो जीवनपद्धतिः वर्तते यस्याः स्थापनां मानवो व्यक्तिरूपेण, समूहरूपेण च करोति। सा आविष्काराणां तादृशः संग्रहो वर्तते, यस्या अन्वेषणं मानवः स्वजीवनं सफलं कर्तुमकरोत्। सः स्वात्मनो बाह्यविश्वस्य च द्वयोः संस्कारं कुर्यात्। इत्थं मनस आत्मनश्च समुन्नतये पूर्णविकासाय मानवः यमपि क्रियाकलापं कुरुते, तत् संस्कृतावन्तर्भवति। संसारे वैदिकसंस्कृतिरेव सर्वप्राचीना, विश्वव्यापिनी वर्तते। यतोहि वेद एव संसारे सर्वाधिकपुरातनं पुस्तकं वर्तते।

उक्तं च-

**अयं पन्था अनुवित्तः पुराणो यतो देवा उपजायन्त विश्वे।** ( ऋग्वेदः 4/18/1 )

**संस्कृतिः सभ्यता च**– संस्कृतिः सभ्यता च द्वावपि शब्दौ युगपत् प्रयुज्येते। तथापि द्वयोः महान् भेदः। संस्कृतेर्विषये लिखितम् संस्कृतिः यदि आत्मा वर्तते तर्हि सभ्यता बाह्यप्रदर्शनं वर्तते। एका शान्तिप्रदा वर्तते तर्हि अपरा सुखप्रदा। संस्कृतिः निःश्रेयसं प्रति गतिं करोति तदा सभ्यता लौकिकाभ्युदयं प्रति गच्छति। सभ्यताशब्दः सभ्य इत्येन निर्मितः। सभ्यमानवस्य भावो मार्गो वा सभ्यता वर्तते। सभ्यस्य अर्थो 'सभायां योग्यः' इति अर्थात् सभायां स्थातुम्, भाषणं अन्यव्यवहारं च कर्तुं यो जानाति स सभ्यो वर्तते। अस्माकं भोजनं, संवादः, वेशभूषा, वार्तालापः अन्यान्यव्य-वहारश्च सभ्यतायामेव अन्तर्भवन्ति। कश्चित् उत्तम-मनुष्योऽपि संस्कृतेर्दृष्ट्या शून्यो पतितो वा भवितुमर्हति। कश्चित् सुसंस्कृतमनुष्योऽपि सभ्यतादृष्ट्या पृष्ठवर्ती भवितुं शक्नोति। प्रायः

नगरनिवासिनः सभ्यास्तु भवन्ति परन्तु सुसंस्कृता भवन्त्येवेति न। एतद्विपरीतं ग्रामीणा अन्येषां दृष्टौ असभ्यास्सन्तोऽपि सुसंस्कृता भवन्ति। तस्य आत्मा निर्मलः सन् प्रेम-दया-सहानुभूतिप्रभृतिगुणैः परिपूर्णो भवति।

उक्तं च -

1. 'सभाया यः' (पा.4/2/105) सभायां साधुः सभ्यः।

2. **एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**
**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः।।**
(मनु. 2/20)

सभ्यनागरिकस्य जीवनं छल-कपटस्वार्थादिभिः परिपूर्णं भवति। अयमेवानयोरुभयोर्भेदः। सभ्यता भौतिकोन्नतौ बाह्यव्यवहारे च आश्रिता वर्तते। संस्कृतिस्तु आत्मनो मनसश्च संस्कारेषु तिष्ठति। संस्कृतिर्यदि आन्तरिकोन्नतिरस्ति तर्हि सभ्यता बाह्यप्रदर्शनम्। अद्यतना व्यक्तिः आत्मानं सभ्यं प्रदर्शयितुं यत्नं करोति परन्तु सुसंस्कृतं भवितुं नैव। सभ्यता प्रत्येकं देशस्य प्रान्तस्य वा पृथग् भवति परन्तु संस्कृतिः मानवसमुदायस्य एकैव वर्तते, सा च-प्रथमा विश्ववारा संस्कृतिः। भारतदेश एव सभ्यतायाः संस्कृतेश्च पाठम् अपाठयत्। यदा संसारस्य अन्ये देशा अज्ञानान्धकारे निमग्ना आसन् तदा भारतं सांस्कृतिकदृष्ट्या समृद्धम् आसीत्। मनोरनुसारं भारतम् विश्वेभ्यो मानवेभ्यः सभ्यतायाः संस्कृतेश्च शिक्षाम् अददात्। तथ्यमिदं पाश्चात्त्यविचारका अपि स्वीकुर्वन्ति।

उक्तं च -

**अयं निजः परो वेति गणना लघुचेतसाम्।**
**उदारचरितानां तु वसुधैव कुटुम्बकम्।।**

अतः संस्कृतिः सभ्यता च न केवलम् एकस्य मानवस्य कृते अपितु समस्तमानवजातेः कृते अनिवार्ये वर्तेते। न केवलं भारतम् अपितु समस्तविश्वस्य इतिहासे दृष्टिपातेन निष्कर्षोऽयं समक्षम् आगच्छति यत् भारतीयसंस्कृतिर्विश्वस्य समस्तसंस्कृतिषु प्राचीनतमा वर्तते। विश्वे ऋग्वेदः प्राचीनतम इति निश्चयेन वक्तुं शक्यम्। सभ्यतासंस्कृति-शब्दयोः व्यवहारः युगपत् क्रियते। संस्कृतेः चतुर्षु अध्यायेषु राष्ट्रकवी रामधारीसिंहो दिनकरः विचारमिमं प्रकटितवान्। विचारोऽयं केवलम् अनुमाने कल्पनायां चाधारितो वर्तते। आदियुगे मानवः असभ्यः सन् वनेषु न्यवसत्। तेषां कापि संस्कृतिर्नैवास्ति। सभ्यताया अभिप्रायो मनुष्याणां भौतिकविचारधारा इति। अधुनातनस्थितौ भारतीयसंभ्यतायां संस्कृतौ च पाश्चात्यसभ्यतायाः भूयान् प्रभावो दरीदृश्यते।

उक्तं च - **आहारनिद्राभयमैथुनं च**
**सामान्यमेतत्पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो,**
**धर्मेण हीनाः पशुभिः समानाः।।**

**अपि च -येषां न विद्या न तपो न दानं,**
**ज्ञानं न शीलं न गुणो न धर्मः।**
**ते मर्त्यलोके भुवि भारभूताः,**
**मनुष्यरूपेण मृगाश्चरन्ति।।**

**- प्राचार्यः,**
राज.ला.शा.संस्कृतमहाविद्यालयः,
चौथवाड़ी (जयपुरम्)

पुस्तक-समीक्षा

# कथासङ्ग्रहद्वयमुपन्यासश्च

❑ महामहोपाध्यायदेवर्षिकलानाथशास्त्री
प्रधानसम्पादकः

नन्दनवनकल्पतरुपत्रिकायां प्रकाशितानां रचनानां सङ्ग्रहप्रकाशनक्रमे कथासङ्ग्रहस्यैकस्य प्रकाशनं **'सौन्दर्यस्य नूतनं द्वारम्'** शीर्षकेण विहितमस्ति। समये समये प्रकाशिता विविधविषयिण्यः 22 लघुकथा अस्मिन् संग्रहे सन्निविष्टाः सन्ति। एकादश कथा मुनिरत्नकीर्तिविजयेन विलिखिताः सन्ति यासु कथैका जेरोम वीडमल नामकेन आङ्ग्लभाषालेखकेन लिखितायाः कथायाः संस्कृतेऽनुवादोऽस्ति 'सौन्दर्यस्य नवं द्वारम्' शीर्षकवहः। अपरैका कथा झवेरचन्दमेघाणीनाम्नो गुर्जरभाषालेखकस्य गुर्जर-भाषाकथायाः संस्कृतानुवादोऽस्ति 'स्पर्शमणिः' शीर्षकवहः। चतस्रः कथाः सुविदितेन विद्वन्मूर्धन्येन प्रो. अभिराज राजेन्द्रमिश्रेण विलिखिताः सन्निविष्टा अत्र। कथाद्वयं डॉ. नारायणदाशेन लिखितमस्ति। कथानामयं सङ्ग्रहः सम्पादकप्रवरेण विद्वद्वर्येण श्रीकल्याणकीर्तिविजयेन संगृहीतः सम्पादितश्चास्ति।

**सौन्दर्यस्य नूतनं द्वारम्** (कथासंग्रहः), प्रकाशकः श्रीअभ्युदयशिक्षणनिधिः, भावनगरम्, निखिल स्टोर्स, पीरछल्ला शेरी भावनगर, पृ.सं. 100, मूल्यम् 150/-

नन्दनवनकल्पतरुपत्रिकायां समये समये प्रकाशितानां सुविदितस्य विदुषः, सम्पादकवर्यस्य च श्रीकल्याणकीर्तिविजयस्य लेखन्या लिखितानां 22 लघुकथानां सङ्ग्रहः 'कथातरङ्गिणी' शीर्षकवहः-पञ्चदशप्रकाशनरूपेण प्रकाशितोऽस्ति।

विविधविषयिण्यो लघुकाया दीर्घकायाश्च नानाविधाः कथा अत्र द्रष्टुं शक्यन्ते। 'भगवन्नाम्नः शक्तिः' अतिलघुकाया कथाऽस्ति, पक्षिपरिषत्, मङ्गलकलशः, दैवविलसितम् इत्यादयः कथा दीर्घकायाःसन्ति। सर्वा अपि कथा बोधं प्रयच्छन्ति।

**कथातरङ्गिणी** (लेखकः सम्पादकश्च श्रीकल्याणकीर्तिविजयः), **प्रकाशकः** श्रीअभ्युदय-शिक्षणनिधिः, भावनगरम्, सङ्केतः प्राप्तिस्थानं च यथापूर्वसूचितम्, पृ.सं. 140, मूल्यम् 200/-

नन्दनवनकल्पतरुप्रकाशनमालायाः षोडशं प्रकाशनमस्ति गुर्जरभाषालेखिकया धीरुबहेन पटेलनाम्न्या विलिखितस्योपन्यासस्य संस्कृतानुवादः आगन्तुकः शीर्षकवहः। अस्मिन् प्रकाशने उपन्यासस्य पूर्वार्ध एव प्रकाशितः। अनुवादोऽयं स्वयं सुविदितेन सम्पादकवर्येण श्रीकल्याणकीर्तिविजयेन कृतोऽस्ति यस्य आचार्यपदारोहणं प्रमोदयति समस्तमपि समाजम्। उपन्यासेऽस्मिन् नायकस्य ईशाननाम्नः संन्यासजीवने प्रवेशः, तदनु विविधा घटनाश्च वर्णिताः सन्ति।

**आगन्तुकः** (संस्कृतानुवादकः सम्पादकश्च श्रीकल्याणकीर्तिविजयः), **प्रकाशकः** श्रीअभ्युदय शिक्षणनिधिः। सङ्केतः प्राप्तिस्थानं च यथापूर्वसूचितम, पृ.सं.150,मूल्यम् 250/-

नारी-स्तम्भः

# जयन्ती-जीजाबाई

❑ डॉ. राजेश्वरी भट्टः

महाराष्ट्रमहानायकस्य, हिन्दुसाम्राज्यसंस्थापकस्य कुशलप्रशासकस्य छत्रपति-शिवाजी-महाराजस्य चरित्रनिर्मात्री प्रेरणाप्रदात्री, राष्ट्रं प्रति समर्पिता, पुण्यश्लोका जननी '**जीजाबाई**' आत्मनो दिव्यैर्गुणैं र्महाराष्ट्रे '**राजमाता**' इति प्रशस्येनोपाधिना सम्मान्यते। कीर्तिकामिनी जीजाबाई 1598 ईशवीये वर्षे 'महाराष्ट्र' प्रदेशे '**बुढलना**' ग्रामे जनिमलभत। बालिकायाः पिता लखुजी जाधव 'सिंदखेड' इति उपनगरे राजकुले उच्चाधिकारी आसीत्। षड्वर्षाणां वयस्येव 'जीजाबाई' इति बालिकाया विवाह उच्चकुले जातेन 'शाहजी' नाम्ना अष्टवर्षीयेण किशोरेण सह विहितः। विवाहानन्तरं सततं महता श्रमेण,साहसेन कर्मकौशलेन च शाहजी बीजापुरनरेशस्य राजनयिकपदे प्रतिष्ठितो जातः। स्वामिभक्तः शाहजी अनेकासु योजनासु तुमुलयुद्धेषु च बीजापुरनरेशस्य कृते दक्षिणहस्त इव सहयोगी बभूव। कर्त्तव्यनिष्ठस्य शाहजीमहोदयस्य निष्ठाभावेन तुष्टेन कृतकृत्येन राज्ञा तस्य कृते प्रसिद्धः 'शिवनेरी' इति दुर्गं उपहारीकृतः। अस्मिन्नेव दुर्गे निवसती जीजाबाई शिववीरस्य सहैव अन्येषां सप्त अपत्यानां जन्मना धन्या जाता। शिववीरस्य जन्मसमये जीजाबाई महोदयायाः पतिः शाहजी मुगलशासकस्य सन्निधौ बन्दी आसीत्। अनेन द्वादशवर्षानन्तरमेव पितापुत्रयोः मेलनमभवत्। दुःखस्यास्मिन् दीर्घावधौ वीरा-गभीरा जीजाबाई धैर्येण साहसेन आत्मविश्वासेन च आत्मनो कष्टं विस्मृत्य अपत्यानां जीवननिर्माणे संलग्नाऽभवत्। जीजाबाई **शिवाजी**, **सम्भाजी** इति द्वयोः पुत्रयोः कृते शस्त्रविद्यायां शास्त्रविद्यायाञ्च नैपुण्यमधिगन्तुं समुचितां व्यवस्थां कृतवती। बाल्यकाले शिवाजी 'दादाकोंडदेव' इति गुरोः निर्देशने शिक्षामधिगतवान्। आध्यात्मिकगुरुरूपेण '**समर्थरामदासः**' शिवाजी महोदस्य प्रेरकोऽभवत्। 'जीजाबाई' स्वयं संप्रबुद्धा एवं सत्संस्कारशीला नारी आसीत्। बालकेषु सत्संस्कारान् संवर्द्धयितुं माता तान् रामायण, महाभारत, गीतादीनां धर्मग्रन्थानां अध्ययनं मननञ्च प्रति प्रेरयामास। मातुः संस्कारैः प्रेरणया च प्रेरितः शिवाजी सप्तदशवर्षाणां वयस्येव महाराष्ट्रसेनाया निर्माणं कृत्वा शत्रुभिः सह प्रवर्त्तमाने तुमुले संग्रामे विजयवैजयन्त्या विभूषितो जातः। धर्मिष्ठा जीजाबाई देव्या भवान्याः परमोपासिकाऽवर्तत। नित्यं भवान्या दर्शनं पूजनञ्च तस्याः परमो धर्म आसीत्। 'सर्वंसहा' पतिव्रता जीजाबाई अन्यैः कष्टैः सह नारीणां कृते दुःसह भर्त्राऽऽचरितं उपेक्षापूर्णं व्यवहारमपि मुद्रित-मुखेनासहत, पातिव्रत्यधर्मञ्च निरवहत। किमधिकं भर्तुः शाहजी महाभागस्य निधनानन्तरं 'जीजाबाई' जीवनं त्यक्तुमुद्यताऽऽसीत् किन्तु पुत्रस्य शिववीर-स्यानुरोधेन राष्ट्रहिताय च सा आत्मानमस्मात् कर्मणो न्यवारयत् राष्ट्रहितकार्येषु च संलग्ना जाता। सिंहगढदुर्गस्य विजयोऽपि नूनं जीजाबाई महाभागायाः सत्संस्कारैः प्रेरणया च हिन्दुसाम्राज्यस्य स्वप्नः प्रत्यक्षो जातः। ततः शिवाजी महाभागस्य राज्याभिषेक महोत्सवस्य द्वादशदिनान्यनन्तरमेव 17 जून 1674 ईशवीये वर्षे गुणानां खनिः 'जीजाबाई' प्राणानत्यजत्। किन्तु महाराष्ट्रस्य वीथिषु शिवाजीमहाराजेन सह जीजाबाई-महोदयाया यशोगानम् अद्यापि जनान् प्रेरयति।

संशोध्य पठनीयम् – 'उर्मिलापुत्रो लक्ष्मण' इति स्थाने 'सुमित्रापुत्रो लक्ष्मण' इति। – 'भारती' अंकः 05, पृष्ठसंख्या– 28

## हिन्दी अनुवाद

महाराष्ट्र के महानायक, हिन्दूसाम्राज्य के संस्थापक, कुशलप्रशासक छत्रपति शिवाजी महाराज की चरित्र निर्मात्री, प्रेरणाप्रदात्री, राष्ट्र के लिए समर्पित, पुण्यकीर्ति सम्पन्न, माता 'जीजाबाई' अपने दिव्यगुणों के कारण 'महाराष्ट्र' में राजमाता जैसी प्रशंसनीय उपाधि से सम्मानित हैं। यशस्विनी जीजाबाई का जन्म 1598 ई. में 'महाराष्ट्र' के 'बुढ़लाना' ग्राम में हुआ था। बालिका जीजाबाई के पिता 'लखुजी जाधव' 'सिंदखेड' ग्राम में राजकुल में उच्चाधिकारी के पद पर प्रतिष्ठित थे। जब जीजाबाई 6 वर्ष की थीं तभी उनका विवाह उच्चकुल में उत्पन्न 'शाहजी' नामक आठ वर्ष के किशोर के साथ सम्पन्न हुआ। विवाह के पश्चात् सतत परिश्रम एवं साहस तथा कर्मकौशल से शाहजी बीजापुर नरेश के राजनयिक पद पर प्रतिष्ठित हो गए। स्वामिभक्त शाहजी ने अनेक योजनाओं एवं भयंकर युद्धों में बीजापुर नरेश का तन-मन से सहयोग किया। कर्त्तव्यपरायण शाहजी की निष्ठा से संतुष्ट एवं कृतकृत्य बीजापुर नरेश ने शाहजी को प्रसिद्ध 'शिवनेरी दुर्ग' उपहार में प्रदान किया। इस दुर्ग में निवास करती हुई जीजाबाई वीर शिवाजी के अतिरिक्त अन्य सात सन्तानों को जन्म देकर धन्य हुई। 'शिवाजी' के जन्म के समय जीजाबाई ने पति शाहजी मुगलशासक के यहाँ बन्दी थे। अत: बारह वर्षों के पश्चात् ही पिता-पुत्र का मिलन सम्भव हुआ। दु:ख की इस लम्बी अवधि में धैर्यशीला, वीर एवं गम्भीर जीजाबाई साहस एवं विश्वास से अपने कष्टों को भुलाकर अपने बच्चों के निर्माण में संलग्न हो गई। जीजाबाई ने **शिवाजी** एवं **संभाजी** दोनों पुत्रों को शस्त्र विद्या एवं शास्त्र विद्या में निपुणता प्राप्त करने के लिए समुचित प्रबन्ध किया। बाल्यकाल में शिवाजी ने 'दादा कोंड देव' के निर्देशन में शिक्षा प्राप्त की। आध्यात्मिक गुरु के रूप में 'समर्थ रामदास' सदैव शिवाजी के प्रेरणास्रोत थे।

जीजाबाई स्वयं संप्रबुद्धा एवं संस्कारशीला नारी थीं। बालकों में सत्संस्कार संवर्धित करने के लिए माता जीजाबाई उनको, रामायण, महाभारत तथा गीता आदि धर्म ग्रन्थों के अध्ययन एवं मनन के लिए प्रेरित करती थीं। माता के संस्कारों से प्रेरित होकर शिवाजी ने सत्रह वर्ष की आयु में ही '**महाराष्ट्र सेना**' का संगठन किया तथा शत्रुओं के साथ प्रवृत्त हुए, भयानक युद्ध में विजय वैजयन्ती से विभूषित हुए। धर्मिष्ठा जीजाबाई भवानी देवी की परम उपासिका थी। नित्य देवी भवानी का दर्शन एवं पूजन जीजाबाई का परम धर्म था। परम सहिष्णु एवं पतिव्रता जीजाबाई ने अन्य अनेक कष्टों के साथ नारियों के लिए असहनीय पति के द्वारा आचरित उपेक्षापूर्ण व्यवहार को भी मौन होकर सहन किया एवं दृढ़ पातिव्रत्य धर्म का निर्वाह किया। अपने पति शाहजी के निधन के पश्चात् प्राण त्यागने को उद्यत जीजाबाई अपने पुत्र शिवाजी के दृढ़ अनुरोध से एवं राष्ट्रहित की अपेक्षा से अपने संकल्प से विमुख हुई तथा राष्ट्रहित के कार्यों में संलग्न हो गई। 'सिंहगढ़ किले' की विजय भी निश्चय ही जीजाबाई की प्रेरणा का ही परिणाम है। जीजाबाई की प्रेरणा एवं सत्संस्कारों से ही हिन्दूसाम्राज्य का स्वप्न प्रत्यक्ष हुआ। राष्ट्रहित में निरन्तर निरत विषम परिस्थितियों में भी विकास की ओर अग्रसर, राष्ट्र के हित के लिए प्राणा धारण करने वाली जीजाबाई ने अपने पुत्र शिवाजी महाराज के राज्याभिषेक के बारह दिनों के पश्चात् **17 जून 1674ई.** को अपने प्राणों का त्याग किया। किन्तु महाराष्ट्र प्रदेश की गलियों में 'शिवाजी महाराज' के साथ जीजाबाई का यशोगान आज भी प्रेरणादायी है।

**- पूर्व-संस्कृतविभागाध्यक्षा,**
**लालबहादुर-शास्त्री कॉलेजः, जयपुरम्।**

आयुर्वेद-स्तम्भः

# यथर्तुलिङ्गाद्विपरीतलिङ्गः कालस्त्वहितः

❑ प्रो. बनवारीलालगौडः
राष्ट्रपतिसम्मानितः, पूर्व-कुलपतिः

**गतदिवसे ख्रिस्तीयस्य त्रयोविंशत्युत्तरद्विसहस्रात्मकस्य वर्षस्य मार्चमासस्यैकविंशतितमे दिनाङ्के न केवलं जयपत्तने राजस्थानस्य बहुषु स्थानेषु च भूकम्पनं सञ्जातमपितु सम्पूर्णे ह्युत्तरे भारतेऽस्यानुभूतिस्तीव्रत्वेन सञ्जाता। ईश्वरस्य कृपया भूकम्पनेऽस्मिन् तीव्रतरत्वं तीव्रतमत्वं वा नैवासीदन्यथा भवनानां जनानाञ्च महद्विनाशस्य सम्भावनाऽऽसीत् ।**

गत दिन 2023 ईसवीय वर्ष के मार्च मास के 21 वें दिनांक में न केवल जयपुर में और राजस्थान के अनेक स्थानों में भूकम्प आया अपितु सम्पूर्ण उत्तर भारत में इसकी अनुभूति तीव्रतापूर्वक हुई। ईश्वर की कृपा से इस भूकम्प में तीव्रत्व या तीव्रतमत्व नहीं था अन्यथा मकानों के और लोगों के अत्यधिक विनाश की सम्भावना थी ।

**वर्षेऽस्मिन् फाल्गुनमास एवर्तुवैकारिका भावाः प्रादुर्भूताः। तीव्रतामापद्यमानाः वैशाखमासस्यार्कस्योस्राः यथा जनान् पीडयन्ति तथैव फाल्गुनमासस्य भास्वतस्तीव्राः गभस्तयः जनानपीडयन्। वातावरणे व्याप्तेन सन्तापेन पीडिताः हि जनाः शीतसंस्पर्शात्मकानां शीतवीर्याणाञ्च द्रव्याणां प्रयोगान् प्रारब्धवन्तः, कफस्य च प्रकोपकालो भवति वसन्तः तत्र शीतद्रव्याणां प्रयोगेण भवति विशिष्टः प्रकोपः कफस्य ।**

इस वर्ष में फाल्गुन मास में ही ऋतु के वैकारिक भाव उत्पन्न हुए। तीव्रता को प्राप्त करती हुई वैशाख मास के सूर्य की किरणें जिस प्रकार से लोगों को पीड़ित करती हैं उसी प्रकार से फाल्गुन मास के सूर्य की तीव्र किरणों ने लोगों को पीड़ित किया। वातावरण में व्याप्त संताप से पीड़ित लोगों ने निश्चित रूप से शीत संस्पर्श वाले और शीत वीर्य वाले द्रव्यों का प्रयोग प्रारम्भ कर दिया। वसन्त कफ के प्रकोप का काल होता है, इसमें शीतद्रव्यों के प्रयोग से कफ का विशिष्ट प्रकोप होता है।

**पुनश्च पञ्चदशदिनेष्वेव पांशुचत्वरनीहारनिर्ह्रादाशनिविसर्गादयः समायाताः प्रयातश्च विवस्वत्सन्तापः। कदाचिदशनिसहितः शिशिरसमूहात्मको नीहारः कदाचिच्चाकाले समायातो मेघं विना गर्जितो निर्ह्रादो जनान् त्रासयतः।**

पुनः 15 दिनों में ही बर्फ के कणयुक्त (ओलों से युक्त) वर्षा, नीहार (शिशिरसमूह, ठण्ड, धुन्ध) एवं बिना गर्जन वाले बादल (नीहारः शिशिरसमूहः, निर्ह्रादो मेघं विना गर्जितम्, अशनिः वज्रभेदोऽग्निः। चक्रपाणिः) और बिजली का गिरना (या चमकना) इत्यादि आ गए और सूर्य का संताप चला गया। कभी बिजली की गर्जना (या वज्रपात) के साथ शिशिर के समूह के रूप में बर्फ के कणों की वर्षा और कभी-कभी अकाल में आया हुआ मेघ के विना गर्जित होने वाला निर्ह्राद लोगों को डराते हैं ।

**हिमप्रदेशे सहसा वर्षितहिमकणसमुदयसमुदितशीतसम्पृक्तसमीरोदितशैत्येन सन्त्रस्ताः सावधानाः**

**जनाः स्वशरीरानुरूपिणीं सुविधानुसारिणी-र्त्तुसुखां यथर्तुशयनासनास्तरणसम्पन्नां व्यवस्थां कृतवन्तः, संवृताः हि ते यानं शयनमासनञ्चापि सेवन्ते। किन्त्वनवधाना अक्षमाश्च जना ऋतुवैषम्येनोद्वेल्लिताभ्यां वातकफाभ्यां पीडिताः भवन्त्येव। अत एव बहवः जनाः अग्निमान्द्य-प्रतिश्याय-कास—श्वास-सन्धिवातामवात-शिरःशूलादिभिर्विकारैः ग्रस्ताः सञ्जाताः, विशेषेण तु स्वल्पविकारग्रस्ताः जनाः वृद्ध-बाल-दुर्बल-श्रान्त-गर्भिणीत्यादयश्च त्रस्ताः सञ्जाताः।**

हिमप्रदेश में सहसा बरसे हुए हिम के कणों के समुदाय से उत्पन्न शीतलता से संपृक्त हवा के द्वारा उत्पन्न शीतलता से सन्त्रस्त सावधान लोगों ने अपने शरीर के अनुरूप और सुविधा के अनुसार ऋतु के अनुरूप सुख प्रदान करने वाली ऋतु के अनुरूप शयन, आसन और बिछौने इत्यादि से युक्त व्यवस्था की, निश्चित रूप से अपने शरीर को सब तरह से अच्छी प्रकार से ढके हुए वे लोग यान, शयन और आसन का भी सेवन करते हैं, लेकिन जो सावधान लोग नहीं हैं या समर्थ नहीं हैं ऐसे लोग ऋतु के वैषम्य से उद्वेलित हुए वात और कफ से पीड़ित होते ही हैं। इसलिए अग्निमान्द्य-प्रतिश्याय-कास-श्वास-सन्धिवात-आमवात-शिरःशूल इत्यादि विकारों से ग्रस्त हुए, विशेष रूप से तो जो थोड़े से विकारों से ग्रस्त लोग हैं वे तथा वृद्ध, बाल, दुर्बल, (किसी भी कारण से) थके हुए एवं गर्भिणी इत्यादि त्रस्त हुए।

**यदा यदा हि कस्मिंश्चिदपि प्रदेशे भवन्तीत्थ-मृतुवैषम्यं तदा तदा हि भवन्ति तदनुरूपात्मकाः विकाराः। अत एवाभिसमीक्ष्यर्तुविकारात्मकानि लक्षणानि तदनुरूपिणी व्यवस्था पूर्वानुभवैः सह विधेया सामान्येन जनेन। तज्जानां विकाराणां निवारणार्थन्तु विशेषज्ञा एव शरण्याः।**

जब-जब किसी भी प्रदेश में इस प्रकार का ऋतुवैषम्य होता है तब तब ही उसके अनुरूप विकार होते हैं। इसलिए ऋतु के विकारात्मक लक्षणों को देखकर सामान्य व्यक्ति के द्वारा उसके अनुरूप व्यवस्था अपने पूर्व अनुभव के साथ करनी चाहिए, लेकिन उससे उत्पन्न विकारों के निवारण के लिए तो विशेषज्ञ ही शरण के योग्य होते हैं।

**एतादृग्विधानां यथर्तुलिङ्गाद्विपरीतलिङ्गकाल-जनितविकाराणामपवारणार्थं सर्वदाऽनपायि-स्वरूपात्मकानां रसायनद्रव्याणां योगानाञ्च सेवनङ्करणीयम्। यतो ह्येतेषां विधिपूर्वकसेवनेन शरीरे रोगप्रतिरोधकक्षमताया अभिवृद्धिः भवत्येव। यद्यपि रसायनसेवनस्य विधिस्त्वति-विशिष्टो भवति यो हि दक्षस्य वैद्यस्य निर्देशेन बह्वितिकर्तव्यतायाश्च सम्पादनेन पथ्यादीनाञ्च परिपालनेनैव सम्पन्नो भवति। न हि सर्वे जनाः सर्वेषां रसायनद्रव्याणां योगानाञ्च सेवनेऽर्हाः भवन्ति पुनरपि केचिद्योगास्त्वेतादृग्विधाः भवन्ति ये सम्पूर्णेन रसायनविधिना सेव्यमानाः विशिष्टफलप्रदाः भवन्ति किन्तु सामान्यविधिना सेव्यमाना अपि तेऽनपायिस्वरूपेण सामान्यफल-दायिनस्तु भवन्त्येव। तेषु ब्राह्मरसायनं च्यवनप्राशश्च प्रथमतः गणनीयौ स्तः।**

इस प्रकार के जिस ऋतु के जो लक्षण होते हैं उन लक्षणों से विपरीत लक्षणों से युक्त काल से उत्पन्न विकारों के अपवारण के लिए (दूर करने के लिए) सर्वदा हानिरहित स्वरूप वाले रसायन-द्रव्यों का और योगों का सेवन करना चाहिए, क्योंकि इन का विधिपूर्वक

सेवन करने से शरीर में रोगप्रतिरोधकक्षमता की अभिवृद्धि होती ही है । यद्यपि रसायन की विधि विशिष्ट होती है जो कि दक्ष वैद्य के निर्देश से अनेक इतिकर्तव्यताओं के संपादन करने से और पथ्य इत्यादि के परिपालन से ही संपन्न होती है । सभी लोग सभी रसायन द्रव्यों के और योगों का सेवन करने के योग्य नहीं होते हैं फिर भी कुछ योग तो इस प्रकार के होते हैं जोकि संपूर्ण रसायनविधि से सेवन किए जाते हुए विशिष्ट फल को प्रदान करते हैं किंतु सामान्य विधि से सेवन किए जाते हुए भी वे हानिरहित स्वरूप से सामान्य फलदायी होते ही हैं। उनमें ब्राह्मरसायन और च्यवनप्राश प्रथम रूप से गणनीय हैं।

**अनयोः द्वयोः मात्रापूर्वकं सेवनं सर्वर्तुषु सर्वदा हितकरं भवति। ऋतुवैकारिकैः भावैः जनितेषु विकारेषु त्वेतौ योगौ विशेषेण फलदौ भवतः। सामान्येन सेवनीयौ ह्येतौ सर्वसुलभावपि स्तः। एतदतिरिक्तं त्वायुर्वेदोक्तायाः दिनचर्यायाः परिपालनमेव रोगापवारकं रोगनिवारकञ्च भवति, पुनरपि चेद्रुग्णो भवति जनः ऋतुविपरीतात्मकैर्भावैस्तदा तु चिकित्सकेन परामर्शो विधेयः। यतो हि यथर्तुलिङ्गाद्विपरीतलिङ्गः कालस्त्वहितः रोगोत्पत्तिकारकश्च भवति।**

इन दोनों का मात्रापूर्वक सेवन करने से सभी ऋतुओं में सर्वदा हितकर होता है। ऋतुवैकारिक भावों से उत्पन्न विकारों में तो ये दोनों योग विशेष रूप से फलदायी होते हैं। सामान्य रूप से सेवनीय ये दोनों सर्व सुलभ भी हैं। इसके अतिरिक्त तो आयुर्वेदोक्त दिनचर्या का परिपालन ही रोग को दूर रखने वाला ( रोग के बचाव में) और रोग का निवारण करने वाला होता है, फिर भी यदि कोई व्यक्ति ऋतु के विपरीतात्मक भावों से रुग्ण हो जाता है तब तो चिकित्सक से परामर्श करना चाहिए, क्योंकि जिस काल में जो लक्षण होने चाहिए उन से विपरीत लक्षण वाला काल तो अहितकर होता है और रोग को उत्पन्न करने वाला होता है ।


हार्दिक शुभकामनों सहित :-

निर्माता

**ए इन्फ्रास्ट्रक्चर लिमिटेड**

**एस्बेस्टोस सीमेन्ट पाइप्स**

**सस्ता, मजबूत एवं टिकाऊ**

सर्वोत्तम 'माजा' तकनीक द्वारा निर्मित पेयजल, कृषि, बोरवैल, सीवरेज एवं ड्रेनेज में उपयोगी तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ

**एवं**

निर्माता

**एस्बेस्टोस सीमेन्ट शीट्स**

**छत एक, लाभ अनेक**

**उच्च गुणवत्ता की फाइबर सीमेन्ट की नालीदार चादरें**

कारखाना : हमीरगढ़ - 311025, जिला भीलवाडा (राजस्थान) दूरभाष: 01482-286102-07

दिल्ली कार्यालय : ए-९ए, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाष:- 011-26961849 / 26965673

जयपुर कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, जयपुर-302001 फोन: 0141-4019691 / 2370566

ईमेल आईडी : jaipur@kanoria.org (Pipe Dn.), sharma.ashok@kanoria.org (Sheet Dn.)

प्रेषण-प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८-५७

डाक पंजीयन
Jaipur City/405/2021-23




स्वत्वाधिकारी-भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् अध्यक्षः शंकरप्रसादशुक्लः प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः- भारतीभवनम्, बी-15, न्यू कॉलोनी, जयपुरम्-३०२००१ • दूरभाषः ०१४१-२३७१०१४

प्रतिष्ठायाम्,